विमृज्य। देवागातु विद इति सर्जत। एष स्नान विधिरिति न्यूष्यगौण्यकामानि हृदयमन्तु असामर्थ्य शा
रीरस्य कालशक्त्या द्यपेक्षया मंत्रस्नानादिकं प्रोक्तं मुनिभिः। गौणकानि दिनि रिति चतुर्विंशति मते ॥२४॥

आग्नेयं भस्मना स्नानं मवगाह्य च वारुणं आपो हिष्ठेति च ब्राह्मं वायव्यं रजसा गवां यत्तु सावर्षे हि तस्नानं दि
व्यमुच्यते। स्नानान्यतानि चापस्तु व्याधितस्योदकं वनेति प्रयोगपरिजाते। आपोहिष्ठादिव्यमुच्यते। अवगाहं
र्वारुणंस्यान्मानसं विष्णुचिंतनं। चतुर्विंशतिमते। अथाशक्ताविशिरस्कं पञ्च स्नानं मंत्रविधानतः। आर्द्रेण वा
ससा वांगमार्जनं कपिलं स्मृतं। अथ सारस्वतं विद्वत्सरस्वती प्रसन्नस्नानं सारस्वतं विदुः। विद्वत्सरस्वती प्रसन्नेति
ति वचः। अथ गायत्रं। गायत्र्या जलमादाय दशकृत्वाभिमंत्र्य। शिरोगानि सर्वाणि तेनोक्षयेत् तेन वारुण स्ना
नं गायत्र्यकं नाम सर्वपापप्रणाशनं। अथ शक्तानां तु तं तू तू। तु जंतत्ज्ञ गुरोपादोदकं मुक्तं तद्या। विष्णुपाद
हि मुपात्तु जलस्या: संभूतं जलं चोद्धृण स्नानमा प्रोति ध्यान स्नानं विशिष्यते। चतुर्भुजं महाकायं शंख
चक्रं गदाधरं। ध्यायीत मनसा विष्णुं स्नानेनमानसमीरितं एतेषु स्नानातु कल्प्यै जपसंध्याः वंदन देव
पनेष्वधिकारो नस्याद्देवपूजादौ। प्रातः स्नातुमशक्तरोगाद्यैर्वा नयाद्भिर्वा पूर्ववस्त्रपरिसज्जनेण।
स्नानेन शुध्यति। स च क मेव नंर्ही स्याद् दुद्रदेवार्चनादिषु। जपे संध्यांतर्या वेदान्सा धीयात यथा विधि

श्री.म.

॥२७॥ त्वाचार्यैः स्मृते॥ इति स्नानविधिः॥ अथ तिलकं॥ ब्रह्मपुराणे॥ पर्वताग्रे नदीतीरे मम क्षेत्रे विशेषतः॥ सिंधुतीरे च व
ल्मीके तुलसीमूलमाश्रिता॥ मृद एतास्तु संपाद्या वर्जयेदन्यमृत्तिका॥ द्वेरवृत्तं दं वाङ्गोपा चंदनाद्यैरूर्ध्वपुंड्र
कं कारयेन्नित्यमेवं हि पापं हरति दिने जाह्नवीतारसंभूतां मृदं मूर्ध्नि बिभर्ति यः॥ बिभर्ति रूपं सोऽर्कस्य
तमोनाशकेवलं शामं शांतिकरं प्रोक्तं रक्तं वश्यकरं भवेत्॥ श्रीकरं पीतमित्याहुर्वैष्णवं श्वेतमुच्यते॥ अं
गुष्ठः पुष्टिदः प्रोक्तो मध्यमायुष्करी भवेत्॥ अनामिकान्नदा नित्यं मुक्तिदा च प्रदेशिनी॥ एतैरंगुलिभेदैस्तु का
रयेन्न नखैः स्पृशेत्॥ लिंकं प्रक्रमः स्मृतिचंद्रिकायां॥ ब्रह्मांडे॥ ललाटे केशवं विद्यान्नारायणमथोदरे॥
माधवं हृदि विन्यस्य गोविंदं कंठकूपके॥ उदरे दक्षिणे पार्श्वे विष्णुरित्यभिधीयते॥ तत्पार्श्वे बाहुमध्ये
तु विन्यसेन्मधुसूदनं॥ त्रिविक्रमं कर्णदेशे वामे कुक्षौ तु वामनं॥ श्रीधरं बाहुके वामे हृषीकेशं तु कर्ण
के॥ पृष्ठदेशे पद्मनाभं ककुदि दामोदरं स्मरेत्॥ द्वादशैतानि नामानि वासुदेवेति मूर्धनि॥ संकर्षणादिभिन्न राम:
स्रमुक्ते चतुर्दश वा द्विनिरिति॥ शौनकः॥ ऊर्ध्वपुंड्रं द्विजो विप्रो वश्चैवं विष्णोः कुर्युर्ब्राह्मणा बुधाः॥ मूर्ध्नि मू ॥१९५॥

मूलेन मंत्रेण शेषद्वादशनामभिः॥ स्थानेषेषु द्विजः कुर्यान्नमोंते॥ प्रणवेन चेति॥ स्थानविशेषेणाकारविशेष
द्वादशनामभिः॥ स्थानेषेषु द्विजः कुर्यान्नमोंते॥ प्रणवेन चेति॥ स्थानविशेषेणाकारविशेषः स्मर्यते॥ निटिले
बाहुवक्षे दंडवत्करणं यद्वेणु हृदये कमलाकारं उदरे दीपवल्लिखेत् वेणुपत्रसमाकारं बाहुमध्ये स
मालिखेत्॥ अधः पृष्ठे स्कंधरे देशे लिखेज्जंबूफलाकृति॥ निटिले भाले दशांगुलप्रमाणं तु उत्तमोत्तम
मुच्यते नवांगुलं मध्यमं स्यादष्टांगुलमतः परं सप्तषड्भिः पंचभिः पुंड्रं मध्यमं त्रिविधं स्मृतं॥ चतुस्त्रिद्व्यंगु
लैः पुंड्रं कनिष्ठं त्रिविधं भवेत्॥ ऊर्ध्वपुंड्रमृजु सौम्यं कनिष्ठांगुलिवत्स्मृतं॥ नासादिकेशपर्यंतमवलांत
धारयेद्विजः सम्यक्॥ मद्भक्तो धारयेन्नित्यमूर्ध्वपुंड्रं विना तु तत्॥ तत्कर्म कारयेन्नित्यं तत्सर्वं निष्फ
लं भवेत्॥ इति प्रयोगपारिजातसंग्रहः॥ ऊर्ध्वपुंड्रं वामध्ये॥ शून्यं न धारयेत्॥ अत्रुवतस्तु रवतन्मध्ये
उमया सह श्रिया हरिरिति नित्यं च साम्यये शांखं॥ शंखचक्राद्यंकनं वतुलसीदलनक्षणं या कुर्यान्नियतं न
रा स यातिपरमां गतिं॥ नैवेद्यं देवं नमस्कुर्यात्तान्देवनिराशयेत्॥ चक्रांकितः सदा तिष्ठेन्न च ... ॥ पाद्मे

दनेति। शंखादिवधांसि वैदिकमार्गभ्रष्टपराणि शिवकेवलयोग्निकां श्चक्रशूलादिकान्द्विजः। न धार
येत्स्मतिमान्वैदिके वर्त्मनि स्थित इत्याश्वलायनोक्ते ब्रह्मांडे। मृत्तिका चंदनं चैव भस्मतोयं चतुर्थकं।
निर्दैर्यथाकालं ऊर्ध्वपुंड्रं भवेत्सदा। स्नात्वा पुंड्रं मृदा कुर्याद्धुत्वा चैव तु भस्मना। देवानभ्यर्च्य गंधेन स
र्वपापनुत्तये। जले च तिलकं कुर्याज्जलांतः कर्मसिद्धये इति। संयद्वैश्नेन कदातार्यकृत्यसेद्धं न भस्म
नेति। स्नान भस्मनो ध्युपुंड्रस्य विहितप्रतिषिद्धत्वाद्विकल्प। संध्यद्वाचारतो व्यवस्थित इति नृसिंह
कात्यायनः। श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने। धृतत्रिपुंड्रः पूतात्मा मृत्युं जयति मानवः। न वि
ष्णुपुराणे सत्यं शौचं जपो होमस्तीर्थं देवादिपूजनं। तस्य व्यर्थमिदं सर्वं यस्त्रिपुंड्रं न धारयेदिति भस्मधा
रणप्रदेशाः स्मृतिरत्नावल्यां। ललाटहृदनाभौ गलांसेबाहुसंधिषु पृष्ठदेशे शिरस्येवं स्थानेष्वेतेषु धा
रयेत्। भस्मधारणे मंत्रानाह पुलस्त्यः। अग्निरित्यादिभिर्मंत्रैः शुद्धभस्माभिमंत्रितं शिवमंत्रेण त रामः
द्धार्यं मंत्रेणाष्टाक्षरेण वा गायत्र्या वाथ देवर्षमंत्रेण प्रणवेन वा। करोति शिवमंत्रेण यः करोति त्रिपुंड्रकं ॥२२६॥

विल्लेः परमवाप्नोति नान्यथा श्रुतिनोदितं। सोपरं पदमवाप्नोति गायत्र्यास्तु निसत्तम। प्राप्नोति ब्रह्मणो रू
पं प्रणवेन न संशय इति। अग्निरित्यादिमंत्राणामाथर्वणस्य पिप्पलाद ऋषिः। गायत्री छंदः रुद्रो देवता भ
स्मशुद्धौ वि॰। अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वा
इदं भस्म वायुरिति भस्म जलमिति भस्म। प्रयोगपारिजाते धार्यं भस्मत्रिपुंड्रं तु गृहिणा जलसंयुतं सार्व
कालं भवेत्स्नात्वा पूर्वतो जलवर्जितं। वानप्रस्थस्य कन्यानां दीक्षाहीननृणां तथा। मध्याह्नात्प्राक् जलैर्युक्तं
परतो जलवर्जितं। मध्यांगुलित्रयेणैव स्वदक्षिणकरस्य तु। त्रिपुंड्रं धारयेद्विद्वान्सर्वकल्मषनाशनमिति
स्मृतिरत्नावल्यां मध्यमानामिकांगुष्ठैरनुलोमतः। अतिप्रत्यमनावुष्यमतिदीर्घं तपत्रयं। नेत्रयुग्मप्र
माणेन त्रिपुंड्रं धारयेद्द्विजः। षडंगुलप्रमाणेन ब्राह्मणानां त्रिपुंड्रकं। नृपाणां चतुरंगुल्यं वैश्यानां द्व्यंगु
लं तथा। शूद्राणामथ सर्वेषां एकांगुल्यं त्रिपुंड्रकमिति। तत्र च त्रिपुंड्रं ब्राह्मणो द्विजन्मनमापि न लं
घयेत्। स्मृत्या विधीयमानस्त्यागी पतितो भवेत्। त्रिपुंड्रेण विना येन विप्रेणापदनुष्ठितं न तथा। नेन तत

ज्ञानंनतद्ध्यानंजपोनतस्य॥ संगृहेयेनसमधारिणंदृष्ट्वावानिंदंतिमानवाः॥ तेषांशूद्रेणसंदृतिमुमेपाविंप
श्वितेनि॥ इतितिलकधारणं॥ अथसंध्यावंदनं॥ तस्यचनित्यतामाहमरीचिः॥ संध्यायेननविज्ञा
तासंध्यायेनानुपास्तिताजीवमानोभवेच्छूद्रोमृतःश्वाचाभिजायतइतिश्रुचित्वसंयाहूनेनकर्मांगितामा
हदक्षः संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु॥ यत्किंचित्कुरुतेकर्मनतस्यफलभाग्भवेदिति॥
अंगताचप्रातःसंध्याया एवेतिकेचित्॥ युक्तंतुवचनांतरप्राप्ततत्तत्संध्याकालोत्तरभावितत्कर्मांगता
संध्यात्रयस्यापि अविशेषात्॥ अत्रिः संध्यात्रयंतुकर्तव्यंद्विजेनात्मविदासदेति॥ अत्रसंध्यापदंसंध्या
मुकर्तव्यत्वात्कालाधिरूपकलक्षणेनात्वरव्यतयानामदर्शपूर्णमासादिवत्तनुत्वकर्मोपासनामरव्यंध्यानं
तदेवचप्रधानंसंध्यामुपासतेयेतुसततंशंसितव्रताः॥ विधुतपापास्तेयांतिब्रह्मलोकंसनातनमिति
फलसंबंधात्॥ अतःरणेर्जुनादिभिर्गेयसामर्थ्यात्सूर्योपासनमात्रंप्रधानमकारीति॥ भारतेतैवम
हाराजदर्शितारणाद्धर्धानिसंध्यागतंमहस्त्रंश्रुमादित्यमुपतस्थिरइति॥ तेन्निरायेउच्यतमत्तयंतमादि

त्यमभिध्यायन्कुर्वन्ब्राह्मणोविद्वान्सकलंभद्रमश्नुतेसावादित्योब्रह्मेतिब्रह्मैवसन्ब्रह्माप्येतियएवंवेदेति
कुर्वणायब्राजपं॥ भद्रमासानंफलंब्रह्मैवत्यादिव्यज्ञानाज्ञावतांप्राप्तेनेनध्यानेनब्रह्माप्नोतीतात्पर्यं॥ व्यास
संतिसूर्यगंब्रह्मसंध्यानांइनिजागतः॥ ब्रह्मादैःसकलैर्मर्त्यैः॥ तत्त्ववांतैःसच्चिदात्मन॥ तस्यदासोहमस्मीति
सोहमस्मीतिवामतिः॥ भवेदुपासकस्येतिद्वैवंबकुविदोविदुः॥ आदित्यस्यैवकालभेदेननामान्याहसएव
गायत्रीनामपूर्वाह्णेसावित्रीमध्यमेदिनेसरस्वतीचसायाह्नेसैवसंध्यात्रिषुस्मृतेति॥ संधिकालोपास्यत्वा
त्संध्येतिमाधवः॥ सम्यग्ध्येयत्वात्संध्येतिनृसिंहः॥ उभययापिध्येयःसूर्यएवस्यत्यंतरेदर्शितः॥ गायत्रीतुभ
वेद्रक्तासावित्रीशुक्लवर्णिका॥ सरस्वतीतथाकृष्णाउपास्यावर्णभेदतेति॥ तत्रैवगायत्रीब्रह्मरूपातुसा
वित्रीरुद्ररूपिणीसरस्वतीविष्णुरूपाउपास्यारूपभेदतइतिव्यासः॥ नभिन्नंप्रतिपद्येतगायत्रींब्रह्मणा
सहसोहमस्मीत्युपासीतविधिनायेनकेनचिदिति॥ प्रतिग्रहान्नदोषाच्चपातकादुपपातकात्॥ गायत्रीप्रोच्य
तेतस्मात्गायंतंत्रायतेयतः॥ सवितृद्योतनात्सैवसावित्रीपरिकीर्तिता॥ जगतःप्रसवित्रीवावाग्रूपत्वात्स

आ॰म॰ रस्वतीव्यासोक्तौ गायत्रीपरस्य मंत्रे प्रयोगस्य प्रतिपाद्यादित्येन सदा भेदोपचार इति निबन्धः ॥ स्म॰ संतरेणा

॥३०॥ यत्राचिंतयेध्यायेत् रूपं घ्रेसमुपस्थितं ॥ धर्माधर्मविनिर्मुक्तः सयाति परमां गतिमिति ॥ इति संध्यास्वरूपं

अथ तत्कालः ॥ धर्मसारे उत्तमा तारकोपेता मध्यमा लुप्ततारका ॥ अधमा सूर्यसहिता प्रातः संध्या त्रिधा

मता ॥ उत्तमा सूर्यसहिता मध्या लुप्ततारका ॥ कनिष्ठा तारकोपेता सायंसंध्या त्रिधा मतेति ॥ अत्रिः स्मृतौ सं

ध्याकालः ॥ प्रागुदयाद्विप्रस्य द्विमुहूर्तं तु नकः ॥ क्षत्रियस्य तदर्धं स्यात्तदर्धं स्याद्विशोच्यते ॥ तथैवास्तमितेर्के

पापैश्च पर्दिनामयं क्रमः ॥ इति दक्षः ॥ रात्र्यन्तयामनाडी द्वे संध्याकालोऽभिमुच्यते ॥ दर्शनाद्रविरेखायास्तदस्तो

मुनिभिः ॥ अस्य ध्यर्द्धयामादासायं संध्याम ध्याह्निकीष्यत इति ॥ इति संध्याकालः ॥ अथ देशः ॥ व्यासः ॥ गृहे

त्वेकगुणा संध्या गोष्ठे दशगुणा स्मृता ॥ शतसाहस्त्रिका नद्यामनंता विष्णुसन्निधौ ॥ बहिः संध्या दशगुणा

गर्तप्रस्रवणेषु च ॥ पुनाति वृषलः स्यानं बहिः संध्यामुपासितेति हिरण्यलोपसंगेन बहिर्गमने अ राम॰

वकाशाभावे आहाग्निः ॥ संध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदा ॥ उभे संध्ये तु कर्तव्ये ब्राह्मणैस्तु गृ ॥१२६॥

हे सदेति ॥ अथ प्रयोगः ॥ शौनकः ॥ प्राणानायम्य विधिवदाचम्य प्रयतेंद्रियः ॥ अथ संध्यामुपास्तिष्ठेत् ॥ इति

संकल्प्य मार्जनं कुर्यादापोहिष्ठेति त्र्यृचेन कैः ॥ पादे पादे क्षिपेन्मूर्ध्नि प्रतिप्रणवसंयुतां ॥ सप्रणवा सिकामंगु

लीभिस्त्वनर्जनामध्यमादते ॥ दक्षिणेनसमाकृष्य सव्येनतु विसर्जयेत् ॥ प्रणवं व्याहृतिसप्तगायत्रीं शिर

सा सह ॥ त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥ दातैर्नासापुटे वायुपुटे वायुमुत्सृजेत्तु वेगतः ॥

न कंपयेच्छरीरं हेतुमयोगापरमोमत इति व्यासः ॥ अप्राणरोधमुत्सर्गं वायोस्त्रिस्त्रिः समभ्यसेत् ॥ ब्रह्माणं

कव्वकं शंवं शंभुं ध्यायेद्देवान्तु क्रमात् ॥ अग्निधाने नवप्रणवेमुक्तेन ॥ आपोहिष्ठाचवेनतु संवत्सर

कृतं पापं मार्जनान्ते विनश्यति ॥ ऋक्त्रये प्रतिपादमादौ प्रणवे मतिनवप्रणवा ॥ ब्रह्माप्याह प्रयोग

पारिजाते ॥ आपोहिष्ठादिभिः पादैः ॥ सिरस्प्रसेच विप्रुषः ॥ पञ्चस्य यापेत्यस्य द्विप्राद्भिः परिषेचयेदिति

स एव धाराच्युते नयेनसंध्योपास्तिर्विगर्हिता ॥ कृते होत्पतत्याह नद्यां तार्थेरुदेवा औदुंबरे च सौवर्णे

राजते दारुसंभवे कृत्वा तु वामहस्ते वा संध्योपास्तिसमाचरेत् ॥ औदुंबरं ताम्रकृते जलमिति शेषः ॥ पा

आ.म.

॥३२॥ त्रानावेवामहस्तेन तु पात्रसत्वेपि। वामहस्ते कृत्वा पेतु संध्यामुपासते। मा संध्या हृपवी ज्ञेया असुरास्तैः
स्तु तर्पिताः इति स्मृतेः। गृह्यपरिशिष्टे तु। अथाचमनोदकमादाय सूर्यश्चेति पिबेत्। सूर्यश्च मामन्युश्च म
न्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शि
श्ना रात्रिस्तदवलुंपतु यत्किंचदुरितं मयि इदमहं मामभृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहेति मंत्राचम
नं। अथ मध्यंदिने। आपः पुनंत्विति समंत्राचमनं आपः पुनंतु पृथिवीं पृथ्वी पूता पुनातु मां पुनंतु ब्रह्मणस्प
ति ब्रह्मपूता पुनातु मां यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम सर्वं पुनंतु मामापो सतां च प्रतिग्रहं स्वाहे
ति च। सायं विशेषः। सूर्यश्चेति मंत्रे सूर्यस्थाने अग्निमापात्याह सत्ये ज्योतिषीत्येवं ब्रूयादिति। भगवां
श्चांह सूर्यश्चेत्यनुवाकेन प्रातःकालेपि बेदपः। अग्निश्चेत्यनुवाकेन सायंकाले पिबेदपः। आपः पुनं रामः
तु मध्याह्ने मंत्राचमनमाचरेदिति। सूर्यस्येति मंत्रस्य याज्ञवल्क्योपनिषदृषिः। सूर्यश्च मन्युपतयो रात्रय ॥११९॥
श्च देवता गायत्री पंक्ति विराजश्छंदांसि रक्षंतामित्यंता गायत्री दुरितमपीत्यंता पंक्तिः पंचपदा पंक्तिः

तिति श्रुतेः। स्वाहेत्यंता दशाक्षरपादद्वयोपेता विराट् दशाक्षरा विराडिति श्रुतेः। पंक्तिश्छंद इति मदनः।
आपः पुनंत्वित्यस्य याज्ञवल्क्योपनिषदृषिः। पूतो वा आपः पृथिवी ब्रह्मणस्पतिश्च देवता अष्टपदा अष्टिश्छं
दः। आचमने विनियोगः। इति मंत्राचमनं। अथ द्वितीयमार्जनं कात्यायनः। प्रणवो व्याहृतयः सगायत्री च तृ
तीयकाः। अब्दैवतं चश्चैव चतुर्थमिति मार्जनं। भगवान्। प्रणवेन व्याहृतिभिः। गायत्र्या प्रणवाद्य
याः। आपो हि ष्ठेति सूक्तेन मार्जनं हि चतुर्थकं प्रजापतिः। ऋगंते मार्जनं कुर्यात्पादांते वा समाहितः। अर्द्धर्चां
ते पादान्ते वा कुर्याच्छिष्टानां मतमीदृशं। अथ पापनिरसनं। भगवान्। उद्धृत्य दक्षिणे हस्ते जलं गोमात्रीया
न्दुमित्रीयान् इति माध्यंदिनोक्ताद्रुचा नासाग्रेनैव पाप्मानमपसारयेत्। तज्जलं नावलोक्यापि वामभा
गे क्षितौ जपेत्। द्रुपदा च वाजसनेयके द्रुपदादिवमुमुचान। स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवा
ज्यमापः शुंधंतु मैनसः। इति कात्यायनः। करेणोद्धृत्य सलिलं घ्राणमासाद्य तत्र च जपेदनियतासुः सूर्य
त्रिः सकृद्वाघमर्षणमिति। आसज्य निरुध्याविकस्य शाखाशाखाविषयः। गृह्यपरिशिष्टे। तदुदकम

वीक्षमाणो वामतोनुवितां व्रजातेन सिंहानां पाप्मानं नुन्नहतं सहस्रधा दलितं चावयेदिति स्मृत्यंतरे॥ ब्र
हत्याशिरस्कं चस्वर्णस्तेयभुजद्वयं सुरायानहृदायुक्तं गुरुतल्पकटिद्वयं तत्संयोगपदद्वंद्वं अंगप्रत्यंगपात
कं उपपातकरोमाणं रक्तश्मश्रु विलोचनं खड्गचर्मधरं कृष्णकुक्षौ पापं चिंतयेदिति॥ इति पापपुरुष
स्मरणं॥ अर्घ्यदानं न ह्युगनप्रधाने फलसंबंधाभावात्॥ गृह्यपरिशिष्टे अथाचम्य दर्भपाणिः पूर्ण
मुदकांजलिमुद्धृत्यादित्याभिमुखः स्थित्वा प्रणवव्याहृतिपूर्वया सावित्र्या त्रिर्निवेदयन्नुत्क्षिपेत्तदेवार्घ्यनिवे
दनं॥ असावादित्यो ब्रह्मेति प्रदक्षिणं परिपतन्परिषिंचन्नापः स्पृशेदिति मध्याह्ने विशेषतत्रैव अथा कृ
त्स्नं यथा हंसवत्या वा त्रिःसकृद्वार्घ्यं निवेदनं असावादित्यो मुद्विपेदिति॥ आश्वलायनः ततस्तिष्ठन्ज
लं तु प्राङ्मुखोंजलिनाक्षिपेत्स्यानात्त्रिसुस्थितं तेजः स्फाटिकस्पात पात्र मं छ त्रार्पत्युत्संप्राप्तं दक्षि
णेन यथांजलिं॥ प्रातः संध्यादिजपेत्ममंत्र संस्पृश्य वैपरीत्येनखेः मंदेहान्नु ध्यत॥ क्रूरां त्रिक्षिपेन्नेष व्याजपी
नृ षोडशाक्षरमंत्रेण पुनराकृष्यसत्वरः॥ पुनर्जलं गृहीत्वैवं तेजोमंत्रेच संस्मरन् एवं त्रिवारमावर्तयेद

गृहीतानसुरान्द्विजः मंत्रेणाकृष्यत त्तेजस्यापयेत्स्मरन् पूर्ववद्ब्रह्ममार्गेण स्मृत्वा संस्थाप्य चात्मनि॥ प्र
दक्षिणं समावर्त्य जलं गृह्याचमेत्ततः इति स्थानाद्वा वाधारमंडपे स्थितं ज्योतिर्नासा दक्षिणं रंध्रेण
आधारमंडपादंतरं जन्मिमागतमंदेहाख्यराक्षसनाशाय तोयेन सह क्षिपेत्॥ गायत्री शिरसानासाव
मरंध्रेण पुनराधारमंडपे स्थापयामिति समर्थ तात्पर्यार्थः॥ मदनपारिजाते व्यासः करान्यां तोयमादाय
गायत्र्या चाभिमंत्रितं आदित्याभिमुखस्तिष्ठंस्त्रिः संध्ययोः क्षिपेत्॥ षोडशाक्षरमंत्रमाह व्यासः॥
षोडशाक्षरकं ब्रह्म गायत्र्याः त्रिरशिरः स्मृतं ॐ आपोज्योतिरित्येषमंत्रश्चैतन्निरापकेति संग्रहे मुक्त
हस्तेन दातव्यं मुद्रां तत्र न कारयेत् तर्जन्यंगुष्ठयोगे तु राक्षसी मुद्रिका स्मृता राक्षसी मुद्रिकार्येण त
त्तोयं रुधिरं भवेत् जले चार्घ्यपादातव्यजस्त्रं नावेक्ष्य विस्थले संशोध्य वारिणा सम्यक्ततोर्घ्यं तु प्रदापये
दिति॥ अथ गायत्रीजपः॥ याज्ञवल्क्यः जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् संध्यां प्राक्प्रातरेवं हि
तिष्ठेदासूर्यदर्शनात्॥ सायं प्रत्यङ्मुख आसीत॥ आनक्षत्रोदयं जपेत्॥ प्रातः प्राङ्मुखस्तिष्ठन्त्रसूर्यो

आ॰म॰

॥३३॥

दयमित्यर्थः॥ गृह्यपरिशिष्टे शुचौ देशे दर्भेष्वासीनो हितेदर्भान्संस्तीर्य व्याहृतिभिः पवित्रपाणिः प्राणायामत्रयं
कृत्वा आत्मानं व्याहृतिभिरभ्युक्ष्य सावित्र्या ऋषिदैवतछंदांस्यनुस्मृत्य षड्भिस्तदंगमंत्रैर्यथांगमात्म
नि न्यस्यात्मानं तद्रूपं भावयेत् तद्यथा नमः सवितुर्हृदयाय नम इति हृदये वरेण्यं शिरसे स्वाहा॥ इ
ति शिरसि भर्गो देवस्य शिखायै वषडिति शिखायां धीमहि कवचाय हुं इत्युरसि धियो यो नो नेत्र
यवौषडिति नेत्रललाटेषु न्यस्य प्रचोदयात् इति अस्त्राय फडिति करतलेस्त्रं प्राच्यादिषु दश्र
सु न्यसेद् यागन्यासोऽयमप्येके नेच्छंति स हि विधिरवैदिक इति अथ मंत्रदेवतां ध्यात्वा आगच्छ व
रदे देवीत्यावाह्य तिष्ठन्नहन्यन्ते सूर्यमंडलदर्शनान्मंत्रार्थमनुसंदधानः प्रणवव्याहृतिपूर्विकां सावि
त्रीं जपेदिति जपवान् सायंप्रातश्च ध्यात्वा सावित्रीमागतां जपेत् सहस्रपरमां देवीं शतमध्यां दशाव
रां गायत्रीं संस्मरेद्धीमान् दिवा सूर्यमंडले मनःसंतोषणं मौनं चैव मंत्रार्थचिंतनं अव्यग्रत्वमनिर्वेदो राम॰
जपसंपत्तिहेतवः इति व्यासस्मृतेः शतमष्टोत्तरं नित्यं अष्टाविंशतिमेव वा विधिना दशकं वापि त्रिकाले ॥१२१॥

सु जपेद्बुध इति जपे आसनान्याह स एव कौशेयं कंबलं चैव अजिनं पट्टमेव च। दारुजं तालपत्रं च आसनं
परिकल्पयेत् कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि वस्त्रासने व्याधिनाशः कंबले दुःखमोचनं
अभिचारे नीलवर्णं रक्तं च रूपादिकर्मणि शांतिके कंबलः प्रोक्तः सर्वेष्टं चित्रकंबलमिति कुशा वै ध्यास
चर्मणी वा उपविश्य ते स एव वंशासने तु दारिद्र्यं पाषाणे व्याधिसंभवं धरण्यां दुःखसंभूतिर्दौर्भाग्यं छिद्र
दारुजे तृणे धनयशोहानिः पल्लवे चित्तविभ्रम इति उपवेशनमंत्र उक्तो गायत्रीकल्पे पृथ्वि त्वया धृ
ता लोका देवि त्वं विष्णुना धृता त्वं च धारय मां देवि पवित्रं कुरु चासनमिति ऋष्यादि ह व्यास पृथिव्या मे
रुपृष्ठं तु ऋषिरित्यभिधीयते सुतलं छंद इत्याहुः कूर्मो वै देवता स्मृता स्मृता मे रोहणे तथा तस्य विनि
योगप्रकीर्तित इति विश्वामित्रः उत्तमं मानसं जप्यं उपांशुं मध्यमं विदुः अधमं वाचिकं प्राहुः सर्वमंत्रे
षु वै द्विजाः इति वृद्धमनुः वस्त्रेणाच्छादितकरं दक्षिणं यः सदा जपेत् तस्य तत्सफलं जप्यं तद्धीनमफलं
स्मृतमिति गौतमः गच्छतस्तिष्ठतो वापि स्वेच्छया कर्म कुर्वते अशुचेर्वा विना संख्यां तत्सर्वं निष्फलं

श्रा॰प॰

३५

न वेदितिबौधायनः नाभिरद्य॥ संस्पर्शे कर्मसंयुक्तो वर्जयेदितिरिति॥ रजतं शंखकैर्मोव्यातपैर्वांगुलिपर्वभि
र्जातं स्याच्छंरव मणिनि॥ प्रवालैश्च सहस्रकं स्फटिकैर्दशसहस्रं मौक्तिकैर्लक्षमुच्यते पद्माक्षैर्दशलक्षं तु सौ
वर्णैः कोटिरुच्यते॥ कुशग्रंथ्या च रुद्राक्षैरनंतफलमुच्यत इति प्रजापतिः॥ अष्टोत्तरशतं कुर्याच्चतुःपंचाश
कं तथा॥ सप्तविंशतिकां मता गोभिलः॥ आयात्वित्यनुवाकस्य वामदेवऋषिः स्मृतः॥ अनुष्टुप् छंदो वा
ग्देवा देवतास्मृता॥ आवाहने तु गायत्र्या विनियोगः प्रकीर्त्तितः॥ व्यासोपि॥ आवाहयेत्तु गायत्रीं तेजोसीत्य
सेति॥ सप्तव्याहृतीनां देवता याह॥ वृद्धपराशरः॥ अग्निर्वायुस्तथादित्यो बृहस्पतिस्तथापएव च॥ इंद्रश्च वि
श्वेदेवाश्च देवताः॥ समुदीरिताः गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च॥ त्रिष्टुप् च जगती चैव छंदांस्य
त्यनुक्रमात्॥ भरद्वाजकश्यपश्च गौतमोत्रिस्तथैव च॥ विश्वामित्रो जमदग्निर्वसिष्ठऋषयः क्रमात् इति
अथोपस्थानं गृह्यपरिशिष्टे जातवेदसे सुनवाम सोममंतश्छं योराद्धृणीमहे॥ नमो ब्रह्मणे नमोस्त्वग्नये इ रामः
त्युपस्थाय प्रदक्षिणं दिशः॥ रन्यनुज्ञाता गच्छ देवी यथासुखमिति संस्थाप्य विसृज्य॥ भद्रं नो अपिवात ॥१२२॥

य मधियानत्वायसं ध्यायै सावित्र्यै सरस्वत्यै सर्वाभ्यो देवताभ्यश्च नमस्कृत्य तत उत्तमे शिखरे देवी भूम्यां
पर्वतमूर्द्धनि॥ ब्राह्मणैरभ्यनुज्ञाता गच्छ देवि यथासुखं कृत्वा शांतिं च॥ कृत्वार्य प्रदक्षिणं परिक्रामं नाम स्वलोकान्पर्तालादालोकेत्रो
क पर्वतात्॥ पेसंति ब्राह्मणा देवास्तेभ्यो नित्यं नमो नम इति नमस्कृत्य नमिरूपसं॥ भद्रगुणस्त्वद्धो
पसंगृह्णीयात्॥ एवं सायमिति मध्याह्नसंध्यायां विशेषस्तत्रैव उद्वाजरूदूद्सुरव उदुत्यं जातवेद
सं चित्रं देवानामिति सूक्ताभ्यामादित्यमुपस्थाय प्रजपमासीनो पयेष्टकालं कुर्यात्॥ इत्येष संध्याविधि
र्व्याख्यात इति॥ देवाद्यनदिमध्याह्निकं दिवानक्तं॥ तत्र विशेषस्त्रिपुंड्रं रात्रौ प्रहरपर्यंतं दिवाकृ
त्यानि कारयेत्॥ अवगाहं ब्रह्मयज्ञं सौरजप्यं च वर्जयेदिति॥ सायंप्रातकाल उपोरुपस्थाने विशेषस्मा
ह्नगर्वन्॥ नमो ब्रह्मण इत्येतां त्रिरुक्त्वा प्रदक्षिणं दिशो नमेति॥ इमं मे वरुण तत्त्वा तिसा ये विशेषतः॥
मित्रस्य चर्षणीधृतः सायं प्रातकाले विशेषतः इति॥ आश्वलायनस्मृतौ तु ऋषिश्च तस्मिन्मंत्रे गायत्री
वव ह्नाच॥ इत्यक्तं मैत्रे मित्रदेवत्यं मित्रस्य चर्षणीधृत इत्यादि मिरित्यर्थः माधवीये नारायणः वार्ता

आ॰म॰

णां निरयाद्धित्संमुपस्थायघ्रदक्षिणामिति नरकाज्जन्मतके वापि प्राणायाममंत्रकं॥ तथा मार्जनमंत्राणां मन
३५ सोच्चार्य मार्जयेत्॥ गायत्री समग्रं वा यस्त्र्यो ध्यांति वेदयेत्॥ मार्जनं तु नवाकार्यं उपस्थानं तन्त्वे वहि इति गा
यत्र्या परिस्रावारं जप्त्वा॥ आपं त्र आ शुचिः कालेति हेन पि जपेदष्टोत्ताम्पलायतो के॥ आ षजस्तः शुचि
राशौच वा न॥ अंगातरेषसामर्थ्ये पित्रर्घ्यप्रक्षेपत्रावरूपकजलामावे महामार्गे वधनेलक्षुच्चावपिउ नये
॥ संध्ययोः कालेरजसाच्चा घर्मसुक्त जेद्धिति अग्निस्मृतेः॥ आश्रुचौ आशौचे इत्यर्थ अग्निं स्वेत्यस्यार्थो माइ
तिमां मन्युःक्रोधस्तइनिमामिनिनादेवतास्तुपनिषदः॥ मन्युपतयो जितक्रोधाः॥ अस्मादयोमारक्षतामित्यन्व
य॥ शिश्या शिश्ने नमुपामुगितिडादेशः इदंपापंतत्कारणंचाहंकारं अमृतयोनौ मेबाहेतौ आत्माद्योज्योतिषी
यरब्रह्मणिजुहोमीत इत्यर्थ मादंतो यंस्वाहा॥ मदापेजावराय्यो ऊतमस्तु॥ एवंसर्वस्वेत पिन्नाप उनंत्विमा
दित्राप पृथिवीमछ रोयंयछरायंसा पृथिवीत्यारणकात्॥ साचमात्मानं पुनातु किंत्वब्रह्मणोवेद रामः
स्यपतिः परमात्मा पुंनं पुनातु॥ व्यत्ययेनबहुवचनं ब्रह्मवेदः पूतापूतमित्यर्थ सुपांसुलुगिति पूर्वस्यव ॥१२५२॥

२॥

र्णः सर्वपरिकृत्स्नेतिशेष॥ मांपुनंतु स्वाहा॥ आर्द्रं राज्यो ऊतमस्त्विति ब्रणावस भवा ऊतिगायत्रीत छिरसां संहे
पतोर्थः कथ्येत॥ ॐब्रह्म भवं तस्मा ऊतानीतिभूः भावयति स्थापयति विश्वमितिभुवा गुणाभावस्थो द्व
सुष्ट इत्यतिशा भुवेते॥ तदितिस्वः महः जनः तपः आजोच्च नेससंकाननयावा ध्यं सवितु देवस्य सूर्यस्य वे
एपंभजनीयं भर्गः संसारभंजनात् ज्योतिरूपं धीमहि ध्यायेमयः सविता नो धियः प्रचोदयात् प्रेरयेदिति
ते ट आपुव्वपकं ज्योतिश्चिद्रूपं रसः सुखं अमृतं मोक्षः इदं ब्रह्मेति ॐ अंगाकुर्वे चितयामितियावत्॥ अथ
काम्यजपाः वसिष्ठः तमुष्टहोत्वं वापि सद्योजातादि पंचकंपंचीहारं महामंत्रं जपेद्धनुदिनं सुधीः॥ आयु
रारोग्यमैश्वर्यं संततिं पूर्वजावनं संपन्नस्त्वं हिंसो हंसच जनतेत्रिवित्नासनादिति॥ आचार्यः वो शांवे वंह
ऐः सौरैः पावमानी भिरेवच॥ अपयेत्वोळपे णपिकां मां अदह्य पापानिकां मांभ्व निखिलां भनेतरौदे वि शिं
पते घोरान्ब्रह्महत्यादिकानपि॥ अपपेत्यो रुपे णपिकामां श्चपत्निउदर्भा नन्त्रातरुद्रे राजसेनचास्य वामी
कयेनवामोक्षम छत्समं देहं किमन्यदधिकं ततइतिऋग्विधाने॥ विप्रोत्नुकं जपन्नक्तं विप्रुरेवन विष्यति

स्नानकालेजप्यमाह व्यासः कुशदनाम गायत्रीं वेदे वाजसनके सहस्रं तर्जले जप्त्वा ब्रह्महत्यां व्यपोहति आ
चतुर्वेसघमर्षणं च संगोनालेखिं सुमंतुः देहस्थविषहतिपेतास्मचमंतर्जले जपेत् सर्वस्मात्पापान्मुच्य
ते अपित्याहृतिरंतर्जलेजपन्सर्वस्मात्पापात्प्रमुच्यते गौतमः अपि वा गायत्रीं पच्छोर्द्धर्चशः समस्तां मा
पिन्निरंतर्जलेजपन्सर्वस्मात्पापात्प्रमुच्यते पिवा प्रणवं निरंतर्जलेजपन्सर्वस्मात्पापात्प्रमुच्यत इति अ
पहोमविधिः दक्षः संध्याकर्मावसाने तु स्वयं होमो विधीयते इति अत्राशक्तौ सगवाह ऋत्विक्पुत्रेण गुरु
भ्रातानागिनेयेनं विट्पति एतैरपि कृतं यत्स्यात्तु तस्वयमेव त्विति विहितिजायात आश्वलायन ॥
स्वयं पुत्रेषि वा पुत्रः कुमार्यंते वासीनायकात्यायन असममंतुदंपत्योर्होतव्यंन त्विगादिनाह पौरस्य
समसंतुन वेष्टुतमनर्थकं उभयोः सन्निधौ मुख्यः अन्यतरसन्निधावनुकल्पः होमकालमाह मनुः
उदितेनुदितेचैव समयाध्युषितेतथेति सायंहोमकालमाह कात्यायनः यावत्सम्यक्प्राव्यतेन नक्ष
त्राणि सर्वाणि पार्वणं तरान्तु रूयते यस्वाम्बयाघनः संवीतःप्रातःप्रहेषांतसायमितित गौणकालपरं

ः यदपि बौधायनः आसायं दितितगौणकालपरं पावर्गंस्थालीपाको दर्वीहोमः पौर्णमासेष्टिस्थपशुहो
ममाहमरीचिः आरीरापशुवे घत्रयाह्नात्रिं कुजायते तथान्यत्वपि चापत्सु पत्नसु पत्न्याहोमो विधीयते का
त्यायनः विहायाग्निं सभार्यश्चेत्सीमामुल्लंघ्य गच्छति होमकालात्ययेतस्य पुनराधानमिष्यते होमश्च
स्वगृह्योक्तविधिना बौधायनः भारद्वाजः होमं चैतानिकं कृत्वा स्मार्तं कुर्याद्विचक्षणः स्मृतीनां वेदमूलत्वा
त्स्मार्तेके चित्पुरा विदुरिति याज्ञवल्क्यः कर्मस्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही दायकालाहृते वापि श्रौतं वै
ताग्निकाग्निषु वैतानिका गार्हपत्यादयः स्मार्तपदं गृह्योक्तकर्मपरं वैवाहिकेग्नौ कुर्वीत गार्ह्यं कर्म यथा
विधि पंचयज्ञविधानं च पंक्तिं चान्वाहिकीं गृही इति मनूक्ते अन्वाहिकं प्रात्यहिकीं अन्यत्तु स्मार्तमिहम
स्वमृहाकृच्छ्र होम मृत्युंजयादिलौकिकाग्नौ अतएव विज्ञानेश्वरेण विनायकशांतौ लौकिकाग्निरुक्तः गृह
शांतौ तद्वायेस्मार्ताग्निलिखनेमूलं चिंत्यं विष्णुः बहुस्तुकं नेवाग्नौ सुसमिद्धे कृतात्राने विधूमे लेलिहाने च
होतव्यं कर्मसिद्धये योनचिपिहुत्वोत्पत्य शैव्यागारे चैव मानवः मंदाग्निरायावीचरस्निग्धा पिजायुत इति

आ.म.

॥२७॥

इतिहोमप्रकरणं॥ अथनित्यदानं॥ महाभारते॥ एकस्मिन्नप्यतिक्रांते दिनेदानविवर्जिते॥ दस्युभिर्मुषितस्ये
वशुक्रमाक्रंदितंमयाअमिति तस्माद्दिनेनवानुसारेण पूगीफलादिकमपिप्रदेयमितिनं सिद्धं॥ अथमं
गलदर्शनं॥ नारदः॥ लोकेस्मिन्मंगलान्यष्टौ ब्राह्मणोगौर्हुताशनः॥ हिरण्यंसर्पिरादित्यआपोराजातथा
ष्टमः॥ मनुः॥ अग्निंचित्रकपिलांसत्रीराजानंभिक्षुमहोदधिं॥ दृष्टमात्राःपुनंत्येतेतस्मात्पश्येत्सदाबुधः इतिइ
त्यष्टधाविभक्तस्याह्नआद्यभागकृत्यंदक्षः॥ द्वितीयेचतथाभागेवेदाभ्यासोविधीयत इतिचतुर्विंशतिमते
वेदस्वीकरणंपूर्वंविचारोभ्यसनंजपः तद्दानंचैवशिष्येभ्योवेदाभ्यासोहिपंचधेतिकौर्मेजिपेदध्यायये
च्छिष्याञ्चारयेद्वाविचारयेत॥ अवेक्षेतचशास्त्राणिधर्मादीनिद्विजोत्तमाइतिदक्षः॥ स्मृतिस्तुप्रकुर्यादी
नांसकालःसमुदाहृतइति॥ अथतृतीयभागकृत्यं॥ दक्षः॥ तृतीयेचतथाभागेपोष्यवर्गार्थसाधनं॥ इतिमि
तिपोष्यवर्गंमिताक्षरा॥ मातापितागुरुर्भार्याप्रजादीनाःसमाश्रिताः॥ अभ्यागतोतिथिश्चाग्निः॥ पोष्यवर्गउदा
हृतः॥ पोष्यवर्गार्थसिद्ध्यर्थंधनमिच्छेतबुद्धिमान॥ आत्मनेपदमार्षं॥ याज्ञवल्क्यः कुसूलकुंभीधान्योवात्र्या राम:

॥२२५॥

हिकोश्वस्तनोपिवा॥ जीवेद्वापित्रिलौंछेनश्रेयानेषांपरःपरः इति॥ स्वकुटुंबभोजनद्वादशदिनपर्याप्तंधान्य
स्याधारयात्रंकुसूलं॥ षडहपर्याप्तधान्याधारःकुंभीवारिणामुपादानं॥ त्रिलंकणोपादानंमुंछमिति॥ यात्रं
कुसूलैःषडहपर्याप्तज्ञवल्क्यः॥ नयज्ञःप्रतिग्रहोयाज्ञुधर्म्यःक्षयात्मवर्तिनइति अश्वस्तनाश्चस्तनानांचसंनिया
तोवधानासंसमुद्दिष्टमतायातितथाराज्ञोधनागम यथाम्भोसंस्थितंसर्वंभुङ्क्तेमायातिकांचनं एवंप्रतिग्र
हःसर्वेंभुंजितायातिराजनीति॥ एतद्धर्मिकराज्ञप्रतिग्रहपरं॥ याज्ञवल्क्यः कुशाःशाकंपयोमत्स्याःपुष्पं
गंधादधिद्विति॥ मांसंशय्यासनंधानाःप्रत्याख्येयंनवारिच॥ अयाचिताहृतंयाह्यमपिदुष्कृतकर्मणः॥ अ
न्यत्रकुलटाषंढपतितेभ्यस्तथाद्विषः॥ अथचतुर्थभागकृत्यं॥ दक्षः॥ चतुर्थेतुतथाभागेस्नानार्थंमृदमाहरेत॥
तिलपुष्पकुशादीश्वस्नायाचाकृत्रिमेजले॥ गृह्यपरिशिष्टे अथमध्यंदिनेतीर्थमेत्येतुपक्रम्यायथावरुणाघा
र्थनादितर्पणांतेनोक्तेनविधिनास्नायानास्मिन्याग्ब्रह्मयज्ञतर्पणादस्त्रंनिष्पीडयेत्॥ अथपुत्रादयोघंतेतप्येइ
तिशंखः॥ प्रातःसंध्यांसनक्षत्रांमध्यमांस्नानकर्मणि सादित्यांपश्चिमांसंध्यामुपासीतयथाविधीतिस्मा

नकर्मणि कृते सतीति शेषः इति चंद्रिकायां माध्याह्निकसंध्याप्रकारस्य पूर्वमेवोक्तत्वात्पंचमहायज्ञा॥ याज्ञव
ल्क्यः॥ बलिकर्मस्वधाहोमः स्वाध्यायातिथि सत्क्रिया॥ भूतपितृमरब्रह्ममनुष्याणां महामखा॥ आश्वला
यनगृह्ये॥ अथातः पंचमहायज्ञा देवयज्ञो भूतयज्ञः पितृयज्ञो॥ मनुष्ययज्ञ इति तद्यदग्नौ जुहोति स देवय
ज्ञो यत्स्वाध्यायमधीते ब्रह्मयज्ञोयद्बलिं करोति स भूतयज्ञो॥ पितृभ्यो यज्ञो यन्मनुष्येभ्यः स मनुष्ययज्ञ इति
तानेतान्यज्ञानहरहः कुर्वीतेति वासयैते नित्याः आस॰ वैश्वदेवं प्रकुर्वीत स्वशाखाविहितं ततः॥ संस्कृता
न्नेन विविधैर्हविष्यव्यंजनान्वितैः॥ रिति वैश्वदेवभूतपितृयज्ञानां नानामूव्यंजनमपि हविष्यमेव घृतादिना
तैलादि तथा च स एव कुलुक्कयान्नपिंषा न्यक्कं ते लक्षार विवर्जितमिति कौमेंशालाग्नौ लौकिके वापि जले
स्म्यामथापि वा॥ वैश्वदेवस्तु कर्तव्यो देवयज्ञः स वै स्मृतः इति॥ लौकिक आ लाग्नौ याकतो व्यवस्था महो गि
रा॥ यस्मिन्नग्नौ पचेदन्नं तस्मिन्होमो विधीयते॥ अत्र वैश्वदेवशब्दो देवभूतपितृयज्ञानां समुदाये उच्यते
तत्र होमो देवयज्ञ बलि भूतयज्ञा स्वधाकारः पितृयज्ञ एवं च तेनैव पितृयज्ञ सिद्धे नित्य श्राद्धं नाव श्यकं

अत एव देवलो नित्यश्राद्धं मासे मासे दिने दिने॥ इति एवं दर्शश्राद्धमप्यग्निकौ संवत्सरे सकृत् पक्षेप्य यथा शक्ति
तत्कालानाहएतेन विधिना श्राद्धं कुर्यात्संवत्सरे सकृत् त्रिश्चतुर्वा यथा श्राद्धं देवे वाग्न्याहाश्वलायन॥ मा
सिकं प्रतिमासं कर्तव्यं॥ पावरा दर्शश्राद्धं॥ वैश्वदेवश्वात्मनोन्नस्य च संस्कारार्थं॥ तानेतान्यज्ञानहरहः
कुर्वीतेति वचनाद्धर्यसायं प्रातः सिद्धस्य हविषस्य जुहुयादिति वचनाच्च॥ एकस्मिन्नयत्ते सयोगदग्ध
त्वमिति पापात्॥ न च प्रतिप्रधानगुणाद्वृत्तेरिति न्यायात्प्रतिपाकं तदा वृत्तिः स्यात्स ध्यावंदनादिवद्दा विन
कानां प्रथमनुष्ठानां च स्यादिति वाच्यं॥ को कस्मिन्काले पुनः पुनः रत्नपच्येत सकृदेव ततु॥ वर्जितत्र प्र
कुर्वीताप्य र्यद्यकस्मिन्काले बहुधान्नं पच्येत गृहपति महानसादेवेतत्॥ बलि तत्र कुर्वीततगोभि
लोक्तेः एतच्च सायं प्रातः कुर्यात् अथसायं प्रातः सिद्धस्य विषस्य जुहुयादिति आश्वलायनोक्तेः उत्तमया
नं नवे प्रातरे च द्विराहृत्यास हवाकाकार्ये यथोक्तं तेनैव प्रातरेव द्विराहृत्या कुर्याद्वा सहतद्विजः सायं वा
यदि भुंजीयात्तत्कृत्वाज्ञानतः स्वयमिति मनुष्ययज्ञस्त्वतिथिपूजाः एषामकरणे प्रायश्चित्तमाह व्यास॥

होमान्नदानरहितं न भोक्तव्यं कथंचन ॥ अविभक्तेषु संसृष्टेष्वेकेनैव कृतं तु वा पयोमूलफलैर्वापि पंचयज्ञा
न्समापयेत् ॥ अकृत्वा पंचयज्ञांस्तु भुक्त्वा चान्द्रायणं चरेदिति ॥ आश्वलायनः ॥ वसतामेकपाकेन विभक्ता
नामपि स्मृतः ॥ एकस्तु चतुरो यज्ञान्कुर्याद्भाग्यज्ञपूर्वकान् ॥ वाग्यज्ञो ब्रह्मयज्ञः ॥ अविभक्ता विभक्ता वा पृथ
क्पाका द्विजातयः कुर्युः पृथग्यज्ञान् भोजनान्याग्निले दिने पृथग्गृह्ये कृपाकानां तु ब्रह्मयज्ञो द्विजन्मनां ॥ स्
तकादौ स्वसुतात्मानं कुर्यान्नकारयेत् ॥ अत्र विकानां पाकभेदे पृथग्वैश्वदेवानुष्ठानं नाद्रियंते शिष्टाः पू
र्वोक्तसर्वादितग्नौ निवचो विरोधे कतिपया दत्ताश्वलायनवचसोबाधात् विकल्प इति केचित् ॥ यत्तु हर
दत्तः सूतकमध्येपि ब्रह्मयज्ञो नित्यास्त्वत्वारो न त्याज्याः ॥ तानेतं तानहरहः कुर्वीतेती सूतके कर्मणां त्यागः
संध्यादीनां विधाय तेत्यादीनाबाधितानां प्रतिप्रसवे नैव सार्थकं ब्रह्मयज्ञस्तन भवति ॥ तस्य चावनध्या
योपवात्मा श्रुचिर्यहेश इति स्मृतात् ॥ तन्न ॥ पंचयज्ञविधानं तु न कुर्यान्मृतिजन्मनोरिति देवलोक्ते श्चह
रहतकीर्तितु संध्यावंदनावत्तिस्पतामात्रबोधकं ॥ अन्तरा वस्मृत्यंतरे ॥ आपत्त्वमपि दातव्यं ॥ आकाष्टम

पितुरुज्यासारचमपि ब्रह्मयज्ञं कुर्यादितिच ॥ तुर्विंशतिमते अलाभे येन केनापि फलशाकादिभिर्द्विजः ॥ पयो
दधिघृतैर्वापि वैश्वदेवं स्ववेशतुः ॥ हस्तेनास्वादिन्निः कुर्याददिभिरंजलिनाञ्जलेपरिशिष्टे ॥ उत्तानेन तु हस्तेन
धंगुष्ठाग्रेण पीडयन्संहितांगुलिपाणिस्त्ववाग्पतो जुहुयाद्बविरिति ॥ गृह्यपरिशिष्टे पित्र्याकं वायदिवा
पत्रं मूलं वायदिवा फलं ॥ संकल्पयेद्यदाहारस्तेनैव जुहुयादपि स्मृत्यंतरेपि कोद्रवं चणकं माषं मसूरं च
कुलत्थकं ॥ क्षारं च लवणं सर्वं वैश्वदेवे विवर्जयेत् ॥ हविष्यान्नवेक्षारादि निरपि श्वस्नेरायांन्यामुस्तोभस्म नि
होतव्यमित्याहायस्तंबः ॥ न क्षारलवणहोमो विद्यते तथापरान्नसंसृष्टस्याहविष्यस्य होममुदीच ॥ तमुत्तंभ
स्मायोत्कजुहुयाल्लवृतमक्षतं चाग्नौ नवतीति ॥ इदं च सिष्ट अन्नाग्निकस्तु पो विप्रासो लंव्याहृतिभिः ॥ स्वयं
कृत्वा शाकलमंत्रैश्च गृह्ये ऐकाकबलिं हरेदिति बौधायनः ॥ प्रवसंवागच्छनोयस्य गृहेकस्मान विद्यते ॥ पंचानाम
हतामेषां सम्राज्ञैः स गच्छतीति ॥ अहोन्त्रि सुत्रोन्नातापवाक्वविक शिष्यश्चसुरमातुलो ॥ पत्नीश्रोत्रियया ज्य
श्चहृष्टास्तबलिकर्मणि ॥ एते त्वं प्रवसत्यंतप्रतिनिधयः ब्रह्मयज्ञस्यापावप्राप्ता देवयज्ञोत्तरतो बाधते

आश्वलायनः सगृह्यविधिना कृत्वा ब्रह्मयज्ञं पुरा द्विजः॥ स्वधायतर्पणान्यां च गृहमेत्याचरेत्परा दिति॥ य
ज्ञुहृदस्पतिः स त्वा वा कर्पणं कार्यः पश्चाद्वा प्रातराहुति॥ वैश्वदेवावसाने वानान्यत्र त्रिमित्ततइतित॥
द्याश्वलायनात्पर॥ आश्वलायनानां॥ तर्पणस्योत्तरांगत्वेनैव तत् स्नात्वा त्वाचोर वक्रियण्णा दित्यस्य तद्दित
रान्यत्स्यैव सार्थकात्॥ तस्मादत्वयापश्चादेति वैश्वदेवावसानेत्वेत्येवं तद्वितीन्यत्स्यैव॥ कारिकायां॥
दर्भान्वहुश्रुचौ देशे प्रागग्रानास्तृणन्सया॥ दर्भेषु परिश्रिप्य॥ कर्मण्य च पाश्चुरव एवसन्॥ कृत्वोपस्थं क
रे सव्येतरज्ञानेप्राग्दिगंगुलौ॥ पवित्रे स्थापयेदङ्कै प्रागग्रे दक्षिणेनतु॥ तं च प्रागंगुलं तेन संदध्याद्दक्षिणं
करमिति तत्रैव॥ सूक्ताद्य जतमं पूर्वमग्निरित्संतित्राक्तिः॥ ॐ पूर्वाव्याहृतीस्तिस्त्र समस्ताश्च सकृद्वदे
त्पच्छत्त्वर्ईचश॥ सर्वासावित्री त्रिर्वेदेदघेति शौनकः॥ ततो यावत्सतिज्ञातमध्यायं सूक्तमेव वाक्स्वं वाप्य
त्तावरूपमधीयात स्वशक्तितइतिरुग्विधाने॥ आग्नेयं सूक्तमाद्यं तु पुण्यं ब्रह्मर्षिसमंतं॥ रायस्पोष राम:
करं धन्यं जपविप्रोऽर्थमाप्नुयात्॥ ऋचैस बोनि मांजपा सम पूतो नियतः शुचिः संहिताफलमाप्नोतिऋ॥ ॥१२८॥

ग्वेदस्य न संशय इति॥ तथा आग्निमीलेजपेत्सूक्तं पापघ्नं श्रीकरं परं॥ पारायणफलं तस्य वेदानां स्यात्सहस्र
श इति॥ आश्वलायनगृह्येऽसयान्मन्येततावरधात्येत या परिदधाति नमो ब्रह्मणे नमोऽस्त्वग्नये नमः॥
पृथिव्यै नमओषधीभ्यः॥ नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमीति॥ एनां च त्रिः पठेत्॥ नमो ब्र
ह्मणइति परिधानीयां त्रिरन्वाहेति॥ मन्त्रे तु उपवेशनात्राक्ता॥ आश्वलायनगृह्येस्मरेति ष्वनाछन्नासीनः शया
नोवायं यं क्रतुमधीतेतेनतेनहास्य क्रतुनेष्टं भवतीति विज्ञायते॥ तस्य ह्वानध्यायोयदात्माशुचिर्यदेश इति
द्वावित्यनध्यायं तदपरिसंख्यायं केषुचिन्निर्जकानध्यायेषु विशेषमहापर्णवः॥ अथयदिवायान्तस्तन
येद्वा विद्योतते वा स्फूर्जद्वेकां वर्चमेकं वा यजुरेकं वा सामाभिव्याहरेद्भूर्भुवः स्वःसत्यं तपः श्रद्धायां जुहोमीति॥
अथ तर्पणं आश्वलायनशैसहगछतातितृ॥ स्वर्हावि·पुत्राभ्रातापचाकृलिकश्रिष्यश्वरमातुला॥ पलाश्यो
त्रियया ज्यश्चदृष्टास्क बलिकर्मणि एतन्तं प्रवसत्यं तपतिनिधय॥ ब्रह्मयज्ञस्यपावशामांदेवयज्ञोत्तरतो
बाधते॥ आश्वलायनः सगृह्यविधिना कृत्वाब्रह्मयज्ञं पुरा द्विजः॥ स्वाधायतर्पणान्यां च गृहमेत्याचरेत्परा

श्रा·म·
॥ ५२॥

द्विति यत्तु बृहस्पतिः सत्वा वागहो देवतास्तर्पयति प्रजापतिर्ब्रह्मा वेदा देवा ऋषयः सर्वाणि छंदां-
स्योंकारो वषट्कारो वषट्कारो व्याहृतयः सावित्री यज्ञा द्यावापृथिवी अंतरिक्षमहोरात्राणि संख्याः सि-
द्धाः समुद्रा नद्यो गिरयः क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसो नागा गावो वयांति गावः साध्या विप्रा यक्षा रक्षां-
सि भूतान्येवमंतान्यथ ऋषयः शतर्चिनो माध्यमा गृत्समदो विश्वामित्रोऽत्रिर्भरद्वाजो वसिष्ठः प्रगाथाः
पावमान्याः क्षुद्रसूक्ता महासूक्ता इति प्राचीनावीती सुमंतु जैमिनि वैशंपायन पैलसूत्र भाष्य भारत
धर्माचार्या जानंति बाहवि गार्ग्य गौतम शाकल्य बाभ्रव्य मांडव्य मांडूकेया गार्गी वाचक्नवी वडवा प्राची-
यी सुलभा मैत्रेयी कहोलं कौषीतकं महाकौषीतकं पैंग्यं महापैंग्यं सुयज्ञं सांख्यायनमैतरेयं महैतरे-
यं बाष्कलं शाकल्यं सुजातवक्त्रं औदवाहिं महौदवाहिं सौजामिं शौनकमाश्वलायनं ये चान्ये
आचार्यास्ते सर्वे तृप्यंतु॥ पुरुषं पितृस्तर्पयतीति प्रजापत्याया एवमंतानीत्येता एकोनत्रिंश-
न्मंत्राः॥ २९॥ अथ ऋषय इत्यस्य इतितु न मंत्रत्वं शतर्चिन इत्याद्या महासूक्तांता द्वादश॥ १२॥ सुमंत्वित्या- रम·
॥१२५॥

द्या ये चान्य इत्यंता द्वाविंशतिः॥ २२॥ ते च तृप्यतु तृप्यतां तृप्यंत्विति यथा योग्यमध्याहृत्य प्रयोज्याः एवमंतामि-
तिस्नोऽडात्मनेपदं प्रयुंजते भिन्नो मंत्र इति नारायणवृत्तौ महासूक्तास्तृप्यंत्वित्यस्यानंतरं पूर्वोक्ता सनका-
दयः संप्रतृप्योः द्यावापृथिवी तृप्येतामिति तोऽडात्मनेपदं भवेत् तत्र तु कारिकाः शौनकाद्यकस्तृप्यतु तृ-
प्यतामिति लोट्प्रायपाठविरोधितेन द्यावापृथिवी तृप्यतामित्येव प्रयोग्यमिति भेदो निर्दिष्टाः सत्य
कारिकास्तु पांसमीपमागत्य तर्पयेद्देवताः एवमंतानि तृप्यंत्विसंते प्रत्युतिमंत्र के पि चेत्प्रजापतिस्तृ-
प्यत्विन्यपो देवतार्पत धातुस्तं तृप्यर्पयालिंगमंत्रां तेषु प्रयुज्यत इति शौनको पि मंत्रैः प्रजापतिस्तृप्य-
त्वित्यारभ्य यथादिति एवमंतानि तृप्यंत्विसेवमंते यथाक्रममितिकर्मे हादिषो आश्वलायनं तेषु षोडश
सु द्वितीयां तेषु तर्पयामिति शेषो योज्यः योग्यत्वात् तच्च तर्पणं नित्यमुक्तं प्रयोगपारिजाते स्मृत्यंतरे दे-
वाता प्रत्युदाश्चैव पितृभ्यो हि न तर्पयेत् देवादीनामृणान्मुक्त्वा नरकं प्रतिपद्यते मनयारिजाते संग्रहे
अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु सव्योत्तराभ्यां पाणिभ्यां अप्यवातर्पणं भवेत् अन्यस्या म्

स्मृ·म·
॥४२॥

ऋंतु विंसं कारिकाशि प्राचीनावीत्यिपो द्गनी तर्पयेत्पितिति पतरः स्वाहा त्रिपश्चैकैकमंजलिमिति योगयाज्ञव
ल्क्यः। सनकश्च सनंदनश्च तृतीयश्च सनातनः कपिलश्चासुरिश्चैव वोढुः पंचशिखस्तथा। एते ब्रह्म
त्रिरवाता। नघा मनुष्याः पूरिकीर्तिता इति एतदाश्वलायनान्यपरं तेवा शतर्चिनो द्वादशैवक्ष्यते कृत्वा
दिति केचित् सनकादयो नेषामदृष्टार्थत्वादिति तु युक्तं कामुषिक्त्वाप्तु विशेषमाह मारख्यापनः मा
द्रमुखवास्तयास्ति स्त्रस्ता मंत्रोत्थी जलांजली निति। मापत्नी वाचार्यत्वादिति तु पत्नीनां पैदयाजेः
जांजलीनिति च। अत्र विशेषमाह हारीतः वसित्वा वसनं शुष्कं स्थले पास्तार्णबर्हिषि विधिज्ञस्तर्पणं
कुर्यान्न पात्रे शुकदाचन। पात्रादाजलमादाय शुभे पात्रांतरे क्षिपेत् जलपूर्णेऽथवा गर्ते न स्थले तु विबर्हिणि
तिपितामहः। हैमरूप्यमयं पात्रं ताम्रं कांस्यसमुद्भवं पितॄणां तर्पणे पात्रं मृन्मयं तु परित्यजेदिति।
त्रांरवतदकेनोदकं दद्यासितः स्यश्च कदाचन उत्रायच शुचौ देशे कुर्यादुकं तर्पणमिति अग्निपुराणे रामः
नागयेषु सुरास्तथा मनुष्याश्चैव मध्यतः पितरो दक्षिणाग्रेषु एकद्वित्रिमिताजलीनिति मरीचिः सौवर्णे ॥२२०॥

न च पात्रेण ताम्ररौ मये न च। औदुंबरेण खड्गेन पितॄणां दत्तमक्षयमिति विष्णुः पात्राशुचिस्थले वाप्यादुदके दे
वतापितॄंस्तर्पयेत्तु यथाकर्म अस्तु सर्वप्रतिष्ठितमिति योगयाज्ञवल्क्यः गृहे हस्तकृतं निषिद्धं तिलान्नमिश्र
येज्जले अतोऽन्यथा तु सव्येन तिलाग्राह्या विचक्षणैः अन्येष्वेति अन्तर्वते न तर्पणं स्मृत्यर्थः गोभिलः रोमसंस्था
न् तिलान्कृत्वा यस्तु तर्पयते पितॄन् पितरस्तर्पितास्तेन रुधिरेणमलेन चेति स्मृतिभास्करे कृष्णाद्यैस्तर्पयेदे
वान् मनुष्यान्कुशमध्यतः द्विगुणीकृत्य मूलाग्रैः पितॄन्संतर्पयेद्द्विज इति योगयाज्ञवल्क्यः कव्यवालोन
लः सोमो यमश्चैवार्यमा तथा अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदोऽपि च यदि स्याज्जीवपितृकः एताव्रिचात
तः पितॄनिति। अत्र कव्यवालतर्पयामीति कव्यवालस्तृप्यतु तृप्यतामिति वा प्रयोगः। एवं नलादिष्वपिं
नपताः सोमपाश्च तथा बर्हिषदोऽपि च यदि स्याज्जीवपितृकादितर्पणे विशेषमाह माधवीये मत्स्यपुराणे:
पितृभ्यः प्रत्यहं दद्यात्ततो मातृभ्य एव च ततो मातामहानां च पितृव्यस्य सुतस्य चेति हारीतः पित्रादीन्
मात्रादीन्मातामहादीन् पितृव्यान्मातुलान् ज्येष्ठभ्रातृंस्तत्पत्नीः मातुलानीस्तत्पत्नीः गुर्वाचार्योपाध्यायान् सु

श्रा॰म॰

॥४३॥

कृत्संबंधिबान्द्ध्यात् दौहित्रपौत्रका रिविप्पनत्तत्स्तोध्यतर्पयेदिति ॥ अथ पित्रादितर्पणे विशेषमाह बोप
देवः तातांबात्मजनिन्यपत्यधववसुकजायापितामहु शिष्या ताः पितरौ महालयविधौ ॥ ततांबा त्रितयं स
पत्नजननी माता महादित्रयं सस्त्रीस्त्रीतनयादितातजननीस्वभ्रातरः सस्त्रियः ॥ तीर्थेन घातर्पणे इति
तातांबात्रितयं पित्रादित्रियं मात्रादित्रयं मातामहादित्रयं सस्त्रीतिसपत्नीकं तर्पयामिति प्रयोज्यं
अपत्यधववसुगीतिसापत्न्यां सघवां तर्पयामि त्यर्थः क मातरं दृष्यहकेस्मतं तरे। आदौ पि ताततो
माता सपत्नजननी तथा मितामहासपत्नीकासपत्नीतरंनंतरं सुतभ्रातृपितृव्याश्च मातुलाश्च स
भार्यकाः दुहिता दुहिता भगिनी चैव दौहित्रो भगिनेयकः पितृष्वसा मातृष्वसा श्वशुरो गुरुरिक्थ
दो भगिन्यो दुहितापश्वशुरा भावुकाः स्नुषाः शालक गुरु राचार्यस्वामी मित्रं पूर्णा क्रमममितिस्वजाम
यः स्वभगिन्याः भावुका भगिनीयतयः एतेषां चुक्रामारगामेच्छिविकल्पः। तत्र विशेषमाह पम ॥ ससंब ॥ रामः
धनामगोत्रेणास्वधांतेन नमो ततः स्वस्वादिरूपं निर्दिश्य तत्पूर्वोत्पितृपूर्वकमिति वसिष्ठः संबंधनु ॥४३॥

कौत्सैव नामगोत्रमनंतरं वस्वादिरूपं संकीर्त्य स्वधाकारेण तर्पयेदिति। अत्र अस्मत्पितरममुकशर्म
णममुकगोत्रं वसुरूपं स्वधा नमस्तर्पयामीत्यादिप्रयोगः। अशक्तो संक्षेपतर्पणे विष्णुपुराणे आब्रह्म
स्तंबपर्यंतं जगत्तृप्यत्विति ब्रुवन् क्षिपेत्तोयां जलीस्त्रीस्त्रीन्कुर्वन्संक्षेपतर्पणं॥ अथ स्मंजलिमाह कात्यायन
:पितृवंशपमातृवंशपापे चान्येमत्त उदकम हेतितांस्तर्पयामीत्यवसानांजलीति ततः सूर्यार्घमुक्तं विष्णु
पुराणे दत्वा कामोदकं सम्यक् एतेभ्यः श्रद्धयान्वितः आचम्य च ततो दद्यात् सूर्याय सलिलांजलीन्॥ नमो
गवते ब्रह्मन्नास्वते विष्णुतेजसे जगत्सवित्रे कर्मदायिने इति तत्र आचम्य हस्तस्यान् कुशान् त्यजेत्
तथा चरलावल्यां विकिरे पिंडदाने च तर्पणे चाद्यकर्मणि आचांतः मन्त्रकुर्वीत दर्भयं त्वजनं बुधः इ
ति तन्मात्रे पितृत्रे च येषां पितानश्च भ्रातृ तातनपुत्रौ नान्यगोत्रिणः ते सर्वे त्रिमाया तु भयोलेष्टैः कुरौ
स्तपेति ततो भूमौ वस्त्रं निष्पीडयेत् तथा च भारद्वाजः वस्त्रोदकम पेक्षंते येम्रतादासकर्मणाः। तस्मात्स
र्वप्रयत्नेन जलं भूमौ निपातयेत् शौनकः देवादितर्पणं कृत्वा तस्मात् निपीडये वस्त्रमाकृते तर्पणे द्विज॥

आ॰म॰

॥४४॥

इति वह्निपुराणे॥ यो ऽग्नौ धयेत्स्नानार्थं प्रस्थितं विप्रं देवाः पितृगणैः॥ सह वायुरूपेण तिष्ठंति तिष्ठपितास्तेजलार्थिनः॥
निराशास्तु निवर्तंते वस्त्रनिष्पीडने कृते तस्मान्न पीडयेद्वस्त्रमकृते तर्पणे द्विजे इति॥ अथ भीष्मतर्पणं॥ व्या
साष्टमुक्ता हेमाद्रौ तु माघस्य दशम्यां प्याय पोजलं संवत्सरकृतं पापं तत्क्षणादेव नश्यति॥ तत्रायं क्र
मः॥ मंत्रः॥ वैयाघ्रपादगोत्राय सांकृत्यप्रवराय च गंगापुत्राय भीष्माय प्रदास्येहं तिलोदकं॥ अपुत्रा
य ददाम्येतत्सलिलं भीष्मवर्मणे॥ इति भीष्मतर्पणं॥ अथ यमतर्पणं॥ हेमसतुः दीपोत्सवचतुर्दश्यां
कार्यं तु यमतर्पणं॥ कृष्णांगारचतुर्दश्यामपि कार्यं सदैव चेति॥ सएवा इह जन्मकृतं पापमन्यजन्मार्जितं
च यत्॥ कृष्णांगारचतुर्दश्यां तर्पयंस्तद्व्यपोहति॥ स्मृतिचंद्रिकायां॥ यमाय धर्मराजाय मृत्यवे चांतकाय च
वैवस्वताय कालाय सर्वभूतक्षयाय च॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने॥ वृकोदराय चित्राय॥
चित्रगुप्ताय ते नमः॥ चतुर्दशैतं मंत्रस्तु तर्प्यंतानमोंतकाः॥ एकैकेन तिलैर्मिश्रान्दद्यात्रीन्त्रीन्जलांजली राम:
न्॥ यावज्जीवकृतं पापं तत्क्षणादेव नश्यति॥ शाक गौतमः॥ यमो निहंता पितृधर्मराजो वैवस्वतो दंडध ॥१३२॥

रश्च कालः॥ प्रेताधिपो दत्तकृतानुसारी कृतांत एतद्दशभिर्जपंति॥ इति दृष्ट्वा गिरावक्त्रे निव्यासः॥ तथा कृष्णचतु
र्दशीयं माघे स्यादि सप्तभिः॥ सप्तोदकांजलीन्दद्यात्सर्वपापैः प्रमुच्यते॥ स्कांदे॥ दक्षिणाभिमुखो भूत्वा तिला
न्सव्येन समाहितः॥ देवतीर्थेन देवत्वात्तिलैः प्रेताधिपो यतः॥ स्मृतिसारे॥ यज्ञोपवीतिना कार्यं प्राचीनावीति
नापि वा॥ देवत्वं च पितृत्वं च यमस्यास्ति द्विरूपता॥ इति यमतर्पणं॥ अथ तर्पणे तिलनिषेधप्रयोगपारि
जाते सग्रहे॥ नंदायां भार्गवदिने कृत्तिकासु मघासु च भरण्यां भानुवारे च गजच्छायाद्वये तथा॥ अयनद्वये
चैमन्वादिषु युगादिषु पिंडदानं मृदास्नानं न कुर्यात्तिलतर्पणं॥ मरीचिः॥ सप्तम्यां रविवारे च गृहे जन्मदिने त
था॥ भृत्यपुत्रकलत्रार्थी न कुर्यात्तिलतर्पणं तथा॥ पक्षयोरुभयोराजन्सप्तम्यां निशि संध्ययोः॥ विद्याधनकुलक
लत्रार्थी तिलान्यत्नेन वर्जयेत्॥ भानुभौमे मैत्रयोर्दर्शपौर्णदामुकुच॥ पिंडदानं मृदास्नानं न कुर्यात्तिलतर्पणमि
ति॥ बौधायनः॥ सप्तम्यां रविवारे च मातापित्रोर्क्षयेहनि तिलैर्यस्तर्पणं कुर्यात्स भवेत्मित्रकंथचित्रमस्त्वेपि
निमित्तविशेषणाम विवक्षितमेव यस्यो न यंह विरात्रिमार्घे दिस्मवेवो नयतं॥ सप्तमीरविग्रहजन्मदिना

श्रा.म.
॥४५॥

नानामन्येषामपिपरत्रिंशानामेवनिमित्ततापतेभ्य॥ अधीकारीविशेषकृते अन्यपुत्रादिकामस्यैवायं निषेध
॥ नात्तुविधुरापुत्राः॥ मन्वंतरेविवाहव्रतचूडास्तुवर्षमर्धकं॥ पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणमिति॥ बौ
धायनः॥ विवाहेचोपनयनेचौलेसतियथाक्रमं॥ वर्षमर्धं तदर्धं चनेत्येकेतिलतर्पणं॥ संस्कारेषुतथान्येषुआ
नपुंसवनादिषुयावन्मास॥ समाप्येतताततिलंडांश्चवर्जयेत॥ हव्यावनंतरंप्राज्ञस्तस्यैवतिलतर्पणमि
ति॥ इत्यमनु॥ संक्रांत्यादिनिमित्तेषुस्नानांगेतर्पणेतथा॥ तिथिवारनिषेधोपितिलैस्तर्पणमाचरेत॥ इति का
त्यायन॥ उपरागेपितु॥ श्राद्धेपातेमायांचसंक्रमेनिषिद्धेपिहिसर्वत्रतिलैस्तर्पणमाचरेदिति॥ व्यतिपातो
वैधृतोपिपिताचपित्र्यारूपजन्मणसंक्रांतिरयनमित्येतिपारिजाते॥ मरीचिः॥ तीर्थेतिथिविशेषेच्छगं
गायांप्रेतपक्षकेनिषिद्धेपिदिनेकुर्यात्तर्पणंतिलमिश्रितं॥ इतितर्पणप्रकरणं॥ अथदेवपूजाक्रमःपु
राणेब्रह्माणंशंकरंसूर्यंतथैवमधुसूदनं॥ अन्यांश्चाभिमतादेवान्भक्त्याक्रोधनोनरः॥ स्वैर्मंत्रैस्तुचये राम:
न्नित्यंपत्रैःपुष्पैस्तथांबुभिः॥ गंधपुष्पमात्रंपंचोपचारद्यं संनव इति॥ तिथितत्वेनृसिंहपुराणे॥ जलेदेवेनम ॥१२२॥

स्तत्यततोगच्छेद्गृहंबुधः॥ पौरुषेणचसूक्तेनततोविष्णुंसमर्चयेदितिस्कांदे॥ ब्रह्मादत्ततुयुगेदेववत्रेतायांभग
वान्रविः॥ द्वापरेभगवान्विष्णुःकलौदेवोमहेश्वरइति॥ मंत्रावैदिकानाममंत्रावा॥ अतएववाब्रह्मोक्तका
रादियुक्तंनमस्कारांतकीर्तितंस्वनामसर्वसत्वानांमंत्रइत्यभिधीयते॥ अनेनैवविधानेगंधपुष्पे
निवेदयेत॥ एकैकस्यप्रकुर्वीतयथोद्दिष्टक्रमेणतुतितत्रैव॥ मात्रांछतगुणंप्रोक्तंनत्राणस्यगुणोत्त
रं॥ भक्तिमंत्रसमेतंतुकोटिगुणोत्तरं महाभाते॥ कलौकलिमलध्वंसंसर्वपापहरंहरिं॥ येर्चयंतिनरानि
त्यंतेपिवंद्यापथाहरिः॥ नियमविधिरयंनतुपरिसंख्या॥ एवंसर्वयुगेषुसर्वेषांपूज्यत्वंननिषिध्यते॥ एत
एवपंचायतनस्थापनप्रकारोज्ञानमायां॥ यदातुशंकरंमध्ये इशान्यांमाधवंयजेत॥ आग्नेय्यांतथाहंसनं
कृत्यांपार्वतीसुतं॥ वायव्यांचसदापूज्याभवानीभक्तवत्सला॥ यदातुमध्येगोविंदमैशान्यांशंकरंयजेत॥ आ
ग्नेय्यांगणनाथंचनैर्ऋत्यांतपनंतथा॥ वायव्यांमंबिकांचैवयजेन्मंत्रासमाहिताः॥ सहस्रांशुंयदामध्ये इशा॥
न्यांपार्वतीपतिं॥ पार्वतिमाग्नेयामेकदंतंचनैर्ऋत्यामच्युतंतथा॥ वायव्यांपूजयेद्देवीं॥ गणमेशे भूमिकौ

आ.म.

॥४६॥

नवानीतु यदा मध्ये ईशान्यां माधवं यजेत्। आग्नेय्यां पार्वतीनाथं नैऋत्यां गणनायकं प्रद्योतनं तु वायव्यामा
चार्यस्तु प्रपूजयेत् हेरंबं तु यदा मध्ये ईशान्यामच्युतं यजेत्। आग्नेय्यां पंचवक्त्रं तु नैऋत्यां जगदंबिकां
वायव्यां तु मणिं चैव यजेन्मंत्री ह्यतंद्रित इति वैस्वस्थानवर्जिता देवाः शोकदुःखभयप्रदा यन्मंडले
स्थिरो राजा साधकश्च विनश्यतीति बोपदेवः। शंभोर्मध्यगते हरीनहरभूदेवा हरौ शंकरेभास्येनाग
स्रवोहरिगणेशाजांबिका स्थापिता। देव्यां विष्णुहरेकदंतरवयो लंबोदरे जेश्वरे नार्याः शंकरभाग
तोतिसुखदा व्यस्तास्तु तेहानिदा इति। अत्र पंचायतनामप्येकस्मा वाहनादिनमस्कारांतं पूजाकांडं कृत्वा
स्यापात्येवकांडानुसमयः मुख्ये पुष्पांजलिं दत्वा गणेशाद्यर्चनं भवेत्। गणेशाद्यं वसुख्यस्थे तत्र सूर्यक
माङ्गोहिति वचनेन क्रमाभिधानात् मुख्यप्रधानदेवताया पुष्पांजलिग्रहे नच तदंता पूजाप्रसज्यते॥ राम:
पुष्पांजलंतरे वापि विधायत इति सारदातिलके गेकायां। युक्तं तु मुख्यस्तोक्रांतस्मतियोगिवां गत्वा
लाभेन चैकप्रयोगविधिकल्पनं। नैत्वेककालत्वावगतः वैश्वदेवीतावत्प्राजापत्यं संस्कारंतीतिवचनात् ॥२३५॥

सर्वेषामावाहनं ततः स्थापनमिति। पदार्थानुसमय एवच। स तु मध्ये पुष्पांजल्यंतां पूजां कृत्वा अंगदेवता
पूजां कार्येति दिक्। न विष्णुमर्चयेत्तारापुष्पैररण्यसंभूतैः पत्रैर्वा गिरिसंभवैः। पुंअपर्युषितैर्निश्छिद्रैः॥
प्रोक्षितैर्जंतुवर्जितैः। आत्मारामोद्भवैर्वापि भक्त्या संपूजयेत्सुरान्। कृमीकोटावपन्नानि शीर्णपर्युषिता
नि च स्वयं पतितपुष्पाणि त्यजेदुपहितानि मालादिभिः मुकुलैर्नार्चयेद्देवमपक्वेन निवेदयेत्। फलं च कृमि
वद्धं च प्रयत्नात्तद्विवर्जयेत्। अलाभे तु सुपुष्पाणां पत्राण्यपि निवेदयेत्। पत्राणामप्यलाभे तु फलान्यपि
निवेदयेत्। फलानामप्यलाभे तु तृणगुल्मौषधीरपि। औषधीनामलाभे तु भवतिपूजितः प्रत्येकमुक्तपुष्पे
ण दशसौवर्णिकं फलं। स्वपिष्वनं पश्चादूनतदेव द्विगुणं भवेत्। विष्णुधर्मोत्तरे धर्मार्जितधनक्रीतैः पुष्पैःकु
र्यात्केशवार्चनं। उद्धरिष्यत्यसंदेहोत्तमश्र्वंसत्पापरा निति विप्रातिरिक्तपरं समित्पुष्पकुशादीनि ब्राह्म
णः स्वयमाहरेत्। शूद्रानीतैः क्रयक्रीतैः कर्मकुर्वन्पतत्यध इति भविष्ये। ब्राह्मणस्य तृणादिति ब्रह्मचरणः
लक्षपुष्पार्चनादौ तु क्रयक्रीतमिति मंत्रकोशः। काम्ये तु लक्षकुशादीनि वहंतं नामदेहयेत्। तद्दर्शनैव नाम्

स्मा॰म॰
॥४७॥

त॥ हि निर्माल्यं तन्नवेत यो॥ तथा देवो परिधृतं यच्च वामहस्ते धृतं च यत्॥ अधोवस्त्रधृतं चैव जले च क्षालितं
च यत् देवतास्तस्य गृह्णंति पुष्पनिर्माल्यतां गतमिति॥ निजपूजार्थं परोपवनादेरपि ग्राह्यं न वचतश्चौर्यदैवता
र्थं च कुसुमं अस्ते यं मनुरब्रवीत्॥ इति वचनात्॥ पूजार्थं पुष्पाणि दिनयाचेत याचितैः पत्रपुष्पाद्यैय
करोमि मार्चनमिति॥ वाराहे तस्यापराधेषु गणितत्वात्॥ भविष्यत्पुराणे प्रहरंति पुते जाती करवीरमहनि
शं॥ तुलस्या बिल्वपत्रेषु जलजेषु च सर्वदा॥ न पर्युषितदोषोस्ति मालिकारगृहेषु च॥ गुरौ राणि कवा निरा
त्रौ हे या निर्मात्स्करे॥ कनकानि कुरंबा निरात्रौ देया निशांकरे दिवा धान्यानि पुष्पाणि दिवा रात्रौ च मल्लिका
तत्रैव॥ जाती शमी कुशा॥ कुंकुम मल्लिका करवीरजं नागपुन्नागका शोकरक्तनीलानि च॥ चंपकं बकु
लं चैव पद्मं च बिल्वपवित्रकं॥ एतानि सर्वदेवानां विहितानि समानि च॥ कंकुकुव कंनागेनागकेसरं॥
पाटला च शमीपत्रं च दुर्गायाः स्तहिताहितं विहितं प्रतिषिद्धं चेत्यर्थः॥ कुंदं पलाशं कुसुमं दूर्वा च शिव रामः
पूजयेत्॥ कुसुंद कुंमंडोणं तगरं सूर्यपूजने॥ विहितनिषिद्धमित्यर्थः॥ ककुम मन्त्रपुष्पं अवकर्णिकारस्तु ॥१३५॥

किं किरातो हरेत्तथा॥ किंकिरातः पीतायकः तिलकं मालती बाणस्तुल्लमालं गराजकं तामडगोर्थं निषिद्धं वि
हितं नवेत्॥ बाणः करसत्ना इति प्रसिद्धः॥ जयः कांता श्वेतपद्मः श्वेतमंदारकं तथा॥ दुर्गायाश्चैव विज्ञेयाश्च
निषिद्धविहितं भवेत्॥ जयेजयंती च अगस्त्यार तिमुक्तश्च वितिरात्ठं च हरे हरौ॥ अपामार्गस्य पुष्पं च गा
र्यायाश्च हिताहितं॥ अतिमुक्तो माधवी च ना॥ तिरीठं मो ध्रुं न र॥ शिवया पुष्पं मंदारश्चापराजिता सू
र्यविष्णोन हितं दमनं शिवसूर्ययो॥ अथ शिवे निषिद्धानि॥ केतकी च॥ तिमुक्तकं दोयूयोमदंतिका॥ शि
रीषसर्जबंधुककुसुमानि विवर्जयेत्॥ अर्को पत्रकुसुमं करजें इतरुद्भव बिजितको रीति सर्जो ब्राज
इंद तरू॥ सिंधुवारः॥ शिवे विचजयेत् कुंदं उन्मत्तं च तथा हरे॥ देवीनामर्कमंदारौ सूर्यस्य तगरं तथा॥ इति वि
ष्णु॥ अर्क निषेधो दुर्गेतरदेवी विषय दुर्गापूजाधिकारे करवीरार्कपुष्पैरित्युक्तत्वात्॥ बिल्वेन तु विष्णु॥
नो नाग धानि नागं धानि पुष्पाणि न कंटकितं कं च तमपि शुक्लसुगंधापि दद्यात॥ न स्कंद द्यात् रक्तमपि कं
कुमजं जलजं च दद्यात॥ अजलजमपि पाठलानि संध्याकारवीरपारी न जत्रामीपत्रपलाशशोककुशा

आ॰ म॰

वर्जनं दद्यात्॥ विष्णुधर्मोत्तरे। हट जपा शाल्मलीपुष्पं शैरीषं कककत्वा धत्तूरकल्पपुष्पार्कं च विष्णोर्निषिद्धं न

॥ ४९ ॥ सिंहपुराणे॥ मालायोग्यता रोहिंस्येसति निर्माल्यं नवनीतकं तुलसी चेदत्ता नां दिनान्न निर्माल्यते तत्फलंते

न घ्रातं कल्येप्यपनयनेन दोषः॥ अथ विहितानि तत्र सूर्यस्य च विष्णुपुराणेन मालती मल्लिका चैव व्र

र्बिमा का शोति सुकः पाटला करवीराणि जपा जपतिरेव च॥ वपकोरो तक॥ कंदोषणो च वरमल्लिका

अशोक कर्णिकारो चत ध्येव चरुषकः॥ शतपत्राणि चान्यानि बकुलं च विशेषतः॥ अगस्तिकिंशुको

तद्वत् सूर्यार्थं नास्करस्य च विहिना नीतिशेषः॥ अथ पत्राणि बिल्वपत्रं नंगराजस्य पत्रकं तमालपत्रं च

हरेः सदा तुष्टिकरं स्व॥ तुलसी कालतुलसी तथा च गिरिकर्णिकारकं चंदन केतकीपत्रकुसुमं सदै

वत पनप्रियं॥ अथ शिवे॥ करवीरो बकश्चैव अर्क उन्मत्तकस्तथा पाटला बृहती चैव तथा च गिरिक

र्णिका तथा काशस्य पुष्पाणि मंदार सपराजिता॥ शमीपुष्पाणि चान्यानि कुब्जकं शिखिनं तथा॥ अ

पामार्गस्तथा पद्मनामा पत्रं सरोचकं॥ यंचकोत्रीरतगरं तथा चैव नागकेसरं॥ पुन्नागं किंकरातं च द्रो ॥ १३६ ॥

रामः

णपुष्पं तथा शुभं॥ शिवायोदुंबरं वज पाम ल्लीतथैव च पुष्पाणि पद्मवृक्षस्य तथा बिल्वप्रियं शुभे कुंकुमस्य

च पुष्पाणि तथैवै कंकतस्य च जीवैलं कुसुमं चैव तथा रक्तोत्पलानि च सुरर्नीणि च सर्वाणि स्थलजान्यौ

दकानि च॥ द्रव्याणि शिरसा देवि योमे भक्त्या निवेदयेत्॥ शिखिनाम परशिरवानीलोत्पलमहत्स्यपयो

मालांसंप्रयच्छति शिवाय विधिवन्त्यातस्यपुफलं शृणु कल्पकोटि सहस्राणि कल्पकोटिशतानि च

वसेच्छिवपुरे श्रीमान् शितुल्यपराक्रमः॥ अर्ककरवीरधत्तूरादेः पुष्पदानफलं नलोरवितं मं प्रयोगरवस्म

यातसामान्यफलं शिवलोकप्राप्तिः॥ अथ दुर्गायाः॥ देवीपुराणे कथ्यन्ते पवस्यामि पुष्पाधायं समासत

॥ कृतुकाल्लोद्भवैः पुष्पैर्मल्लिकाजातिपुष्पकैः॥ सितरक्तैस्तथा पुष्पैः पद्मैश्च पांडुरैस्तथा॥ किंशुकैस्तग

रैश्चैव किंकरातैः सचंपकैः॥ बकुलैश्चैव मंदारैः कंदपुष्पैस्तारियकैः॥ करवीरार्कपुष्पैश्चापराजितैः॥ शि

तरक्तस्वपार्पातैः तुलसी श्चैव चतुर्विधैः॥ धत्तूरकातिपुष्पैश्च बंधूकागस्तिमंभवैः॥ मदनैः सिंधुवारैश्च सु

रभिमरुचकैस्तथा॥ लताभिवालवक्षस्य दूर्वांकुरैः सुशोभनैः॥ मंजरीभिः कुशाना च बिल्वपत्रैः सुशोभनैः

श्रा·म·

॥४९॥ ॥राक्षान्वितैः स्तथा सर्वैर्जलजैः स्थलसंभवैः॥ पत्रैः पुष्पैर्यथान्यायं सर्वौषधिमयैः शुभैः॥ धानानां सर्वपित्रे
श्च पुष्पैश्चैव प्रपूजयेत्॥ बिल्वपत्रैर्जनेराजसूयफलं लभेत्॥ करवीरस्रजा राजसूयफलं॥ एवमस्मत्
श्च पविष्ट्यो॥ नरसिंहपुराणे॥ मल्लिका मालती केतक्यशोकपंचकैः पुनागनागवकुलैः पद्मकैरुत्प
लादिभिः॥ एतैरन्यैश्च कुसुमैः प्रशस्तैः पूजनं हरेः॥ वामनपुराणे॥ जाती शताह्वा सुमनाः कुंदं बहुपुटस्त
था बाणं च चंपकाशोकं करवीरं च यूथिका॥ पारिभद्रं पाटला च बकुलं गिरिशालिनी॥ तिलकं जासु
वनजं पीतजं तगरं त्वपि एतानि हि प्रशस्तानि कुसुमान्यच्युतार्चने॥ सुरभीणि तथान्यानि वर्जयित्वा तु के
तकीं॥ केतकी धंतूरमिति केचित्॥ वनकेतकीत्यपरे॥ शताह्वा शोक इति प्रसिद्धा॥ सुमनाः सुवर्णजा
तीः॥ बहुपुटः कर्णिकारः॥ जसुवनजं जपा॥ गिरिशालिनी श्वेतकुटजं॥ अथ पत्राणि॥ अपामार्ग
स्य प्रथमं भृंगराजमतःपरं॥ तस्माच्च खादिरं श्रेष्ठं शमीपत्रं ततःपरं॥ दूर्वापत्रं तथा श्रेष्ठं॥ ततोपि च राम:
कं बिल्वपत्राद्यस्ये हरेस्तुलसीपत्रमुत्तमं॥ एतेषां तु यथालाभं पत्रैर्यश्चार्चयेद्धरिं सर्वपापविनि ॥१३७॥

र्मुक्तो विष्णुलोके महीयते॥ नृसिंहपुराणे॥ कृष्णमूर्ध्नि विन्यस्ता तुलसीपत्रमंजरी॥ सुवर्णकाविपुलं पुण्यं प
यच्छत्यतोधिकं॥ तुलसीरोपणमंत्रः॥ महाप्रसादजननी सर्वसौभाग्यवर्धनी॥ आधिव्याधिहरा नित्यं तुल
सि त्वं नमोस्तु ते॥ द्रोणपुष्पैस्तथैकस्मिन् साधकाय निवेदिते॥ दश दत्वा सुवर्णानि तत्फलं लभते नरः॥
अगस्तिकुसुमैर्देवं योर्चयेज्जनार्दनं॥ दर्शनात्तस्य देवर्षे नरकान्नको नु पास्यति॥ द्रोणपुष्पं खादिरं च
शमी बिल्वं च कंटपा॥ बकं बकुलनागा च वर्णकिरवारं तथा श्वेतं च किंशुकं कुशपुष्पं तमालं च चंप
काशोककेतकी॥ त्रिसंध्यं मालती पुष्पं त्रिसंध्यं श्वेतजातुपा॥ कुंदं च शतपुष्पं च मल्लिका जातिपुष्पकं पू
र्वपूर्वसहस्रेभ्योधिके स्यादुत्तरोत्तरं॥ जातीपुष्पसहस्रेभ्योधिके स्यादुत्तरोत्तरं॥ जातीपुष्पसहस्रेण
पद्मेन्मालां सुशोभनां॥ विष्णवे विधिवद्दत्वा॥ तस्य पुण्यफलं शृणु॥ कल्पकोटिसहस्राणि कोटिशतानि
च वसेद्विष्णुपुर्यां मानवविष्णुतुल्यपराक्रमः॥ मंजरीसहकारस्य केशवोपरि नारद॥ यच्छति ते महात्मानो
गोकोटिफलभागिनः॥ पुरं प्रियपुष्पं यो दद्यादेकमप्यपंडितः॥ तिष्ठ पात्रप्रदानस्य फलमाप्नोत्यसंशयं॥

श्रा॰म॰
॥५०॥ पुरंध्रिपूर्वदेशाधुरिति पुष्पाध्याय ॥ अथ पूजायतनानि ॥ अग्निपुराणे ॥ अश्वमेधफलं ह्यस्य येऽर्चयंति स्थंडिले
प्रतिमासु च ॥ षट्स्वेतेषु हरेः सम्यक् ॥ अर्चनं मुनिभिः स्मृतं ॥ स्कांदे कामाराक्षोपवाक्यं ॥ शालिग्राम
शिलार्चनात् ॥ नक्रयानायदिवा मर्त्या कलौ मुक्तिमवाप्नुयात् ॥ वैवस्वतभयं नास्ति तथा च कलिकाज ॥
लं यः कथां कुरुते विष्णोः शालिग्रामशिलाग्रतः ॥ शालिग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते ॥ महापूजां
तु कृत्वादौ पूजयेत्ता ततो बुध इति ॥ शिवायतनं नारते मदीतं यज्ञते यस्तु श्रद्धयासु निपुंगवलिंगे बापि
स्थंडिले वापि शंकरं विधिपूर्वकं ॥ युगत्रेयं विनिर्जित्य रुद्रलोके प्रमोदत इति ॥ भविष्ये बाणलिंगानि रा
जें दख्यातानि भुवनत्रयेन प्रतिष्ठा न संस्कारस्तेषामावाहनं तथेति ॥ हेमाद्रौ ब्राह्मणे वासुदेवस्तु
न्तपेः संकर्षणस्तथा ॥ प्रद्युम्नः स्नानिज्यते वैश्ये रनिरुद्धस्तु शूद्रजे रिति ॥ विष्णुधर्मोत्तरे पंचव
क्तो वासुदेवः षड्भिः द्भिः प्रद्युम्नकः स्मृतः ॥ संकर्षणः सप्तचक्रो निरुद्धः काद्दशैः स्मृतः ॥ चत्वारो ब्राह्म राम:
णे पूज्यास्त्रयो राजन्यजातिभिः ॥ वैश्यै द्वावेव संपूज्यौ तथैकः शूद्रजातिभिरिति यत्तु स्मृत्यंतरे ॥ ॥१३९॥

राक मूर्तिं न पूज्यैव गृहिणा भूतिमिच्छता ॥ अनेकमूर्तिसंपन्नः सर्वकामानवाप्नुयात् ॥ तत्काम्यपूजापरं ॥
नैवणिकपरं वा शूद्रस्यैकविधानात् ॥ यदपि शालिग्रामाः समा पूज्या विषमा न कदाचन ॥ समेषु द्वितयं नैव वि
षमेष्वेकमेव हीति तत्र पाद्मत्रयं विप्रपरं ॥ तत्राप्याद्या उँ चत्वारो ब्राह्मणै पूज्या इत्यस्यैवार्थमनुवदति ॥ दत्ती
यपादस्तु अनेकमूर्तिसंपन्न इत्यनेकताप्राप्तौ द्वयोर्निषेधकं अत्यपादस्तु शूद्रस्तु परः ॥ यत्तु विष्णुधर्मो
त्तरे ॥ शालिग्रामशिलां वापि चक्रांकितशिलां तथा ॥ ब्राह्मणः पूजयेन्नित्यं क्षत्रियादिर्न पूजयेत् ॥ तत्स
त्रियादिशब्दस्य तिमष्यपदलोपि बहुव्रीहिग्रहेण तद्गुणसंविज्ञानबहुव्रीहिणा शूद्रपरं तथा च
पल्लवः प्रणवोच्चारणाच्चैव शालिग्रामशिलार्चनात् ॥ ब्राह्मणीगमनाच्चापि शूद्रश्चांडालतां व्रजेत् ॥ एत
दपि शूद्रस्य सहितपूजानिषेधार्थं ब्राह्मणैरेव पूज्यो हं सुचेरप्यशुचेरपि स्त्री शूद्रकरसंस्पर्शो वज्र
स्पर्शाधिको मम इति लैंगोक्तेः स्त्रीणामनुपनीतानां शूद्राणां च नराधिप स्पर्शने नाधिकारोस्ति विष्णौ वा
शंकरस्य चेति ॥ शूद्रो वानुपनीतो वा स्त्रियो वा पतितोऽथवा ॥ केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते ॥ इति

श्राम.

॥५१॥ वृहन्नारदीयाद्वेतिमहच्चणा॥ स्वाम्प्रश्नयोः साक्षात्पूजानिषेधमिति युक्तं अतएव पाद्मे॥ ब्राह्मणक्षत्र
वैश्यानां त्रयाणां मुनिसत्तम॥ अधिकारः मतः सद्भिः शालिग्रामशिलार्चने॥ स्वाम्प्रश्नपतितादीनां च
विकर्मिणां॥ नैवाधिकारो विज्ञेयः शालिग्रामशिलार्चने॥ इति स्कान्दयुक्तेः स्त्रियाः शूद्रैर्मद्यपानविवर्जितैः॥
कर्तव्यं ब्राह्मणद्वारा शालग्रामशिलार्चनमिति॥ तत्रैव द्वारकायां लसंन्तं यस्तोयं पिबते कलौ॥ पापानि त
स्य नश्यंति शतजन्मार्जितान्यपि॥ धृतेशिरसि पातेच सर्वास्तिष्ठन्ति देवताः॥ नायच्छिंति हि पापानां कलौपा
दोदकं हरेरिति॥ शिलैव दैवसं स्थापैण द्वारकाशिलार्चनमिति॥ तत्रैव द्वारकायां वेतु ततो पयानविधे
॥ साधिरुत्त्वयामेणसह पूज्येति केचित्॥ नतो पापुनमात्रे पूजायंतुमानानाइत्यपरे॥ अथ विष्णोर्गं
धपुष्पादि॥ विष्णुधर्मोत्तरे॥ कलौयच्छति ये विष्णौ तुलसीकाष्ठचंदनं॥ विष्णुप्रीतिकरं मर्त्यो उरायं तितै
स्तुषेनवं योर्चयेन्माधवतो उष्ठे नत्युयस्तनयो नवेत्॥ अहोमुरवा मत्तेनस्त्यस्ते पतिताः कलिकं द रामः
रैयेनार्चिता हरिर्नेत्रया कमलेरमितैः॥ मितैरिति पाद्मे कार्तिकके तु कौयुष्मंयेन दत्तं हरेः कलौ॥ द ॥२३९॥

पद्मानंच देवर्षेता रितंतेनदै कुलमाति॥ अथ पूजेति कर्तव्यंता॥ अग्नेयपुराणे॥ अर्चनंप्रवक्ष्यामिविष्णोरमित
तेजसः॥ यत्कृत्वा मुनयः सर्वे परं निर्वाणमाप्नुयुः॥ अनुष्टुभस्य सूक्तस्य त्रिष्टुबंतस्य देवता॥ पुरुषोयोजगद्दीपन्न
षिर्नारायणः स्मृतः॥ प्रथमां विन्यसेद्वामेद्वितीयां दक्षिणे करे॥ तृतीयां वामपादे च चतुर्थीं दक्षिणे न्यसेत्॥
पंचमां वामजानौ च षष्ठं चैव दक्षिणे न्यसेत्॥ सप्तमीं वाककट्यां तु अष्टमीं दक्षिणेपि या॥ नवमीं नाभिमध्ये तु द
शमीं हृदये तथा॥ एकादशीं कंठमध्ये द्वादशीं वामबाहुके॥ त्रयोदशीं दक्षिणे तु तथैवास्ये चतुर्दशीं॥
अक्ष्णाः पंचदशीं चैव विन्यसेन्मूर्ध्नि षोडशीं॥ यथा देहे तथा देवे न्यासं कृत्वा यथाविधि॥ न्यासेनतु भवे
त्सोपि स्वयमेव जनार्दनः॥ एवं न्यासविकृत्वा पश्चात्पूजां समाचरेत्॥ पूर्वमावाहये देवं॥ आसनं द्वितीय
या॥ पाद्यं तृतीयया चैव चतुर्थ्यार्घ्यप्रदापयेत्॥ पंचम्याचमनं दद्यात् षष्ठ्या स्नानं समाचरेत्॥ सप्तम्या
तु तती वासो ह्यष्टम्यां चोपवीतकं॥ नवम्या चंदनं दद्यात् दशम्या पुष्पमेव च॥ एकादश्या तथा धूपं द्वाद
श्यां दीपमेव हि॥ नैवेद्यं तु त्रयोदश्या नमस्कारे चतुर्दशी॥ प्रदक्षिणे पंचदशी वर्जने षोडशीं तथा॥

वर्जने विसर्जने स्नाने वस्त्रे चनैवेद्ये दद्यादाचमनं तथा कृत्वा षोडशभिर्मंत्रैः षोडशान्स्पचारुकृतांपुनःषो
डशभिर्मंत्रैर्दद्यात्पुष्पांजलिं षोडश तच्च सर्वे कृत्वा पौरुषं सूक्तमेव च षण्मासात् सिद्धिमाप्नोतिह्येव
मेवसमर्चयेत् इतियत्तु भागवतेउक्तमासनादौ वाहनेनतु स्थिरायामुद्दवार्चने चस्थिरायां विकल्प
स्यात्स्थंडिलेचनवेद्ध्यमितियद्दपिस्कांदे शालिग्रामार्चनेनैव आवाहनविसर्जने सोलग्रामेहि
भगवान्समुद्भूतः सदा हरिरित्यावाहनविसर्जननिषेधः तत्रदेवावियोगेमंत्रराजविधौ आवाह
नंकुर्यादद्यात्पूर्वं पुष्पांजलिं हरेः तस्यैवोन्मुखता प्राप्तियागे चोआसने शंकुचा अंते चोद्वासनं दद्या
द्वासंसंमुद्रिभिरुदयेशति तत्रैव प्रतिमापट यंत्राणां नित्यस्नानंनकारयेत् कारयेत्पर्वदिवसे यथामल
लनिवारणानिति वस्त्रमपि न प्रत्यहं नियमेनतु तन्मेवसमपणीयां वस्त्रमनुद्वारण द्वयेतु अपरंतुदिने
दिने इतितत्त्वसागरोक्तेः अपरंपुष्पादितत्रैवपात्रं च इत्थयावत्तिष्ठतिदेवता निर्माल्यं भवेत्तावद्वस्त्र
र्गंधपुष्पविभूषणा इति बौधायन अथातोमहादेवस्या हरहः परिचर्याविधिं व्याख्यास्यामः स्नात्वा शु

चौदेशेगोमयेनोपलिप्तं प्रतिकृतिं कृत्वाक्षतपुष्पैर्यथालाभमर्चयेत् सत्पुष्पोदकेन महादेवमावाह
येत् ॐ भूः महादेवमावाहयामि ॐ भुवः महादेवमावाहयामि ॐ स्वःमहादेवमावाहयामि इत्यावाह्य अयातु
भगवान्महादेव इत्यर्थ स्वागतेनाभिनंदति स्वागतं भगवन्महादेवायेति आसनं कल्पमास्तां भगवान्महादेवस्य
त्र कल्पं ददाति भगवतो अयं कूर्चो भयपवित्रं हरितसुवर्णःस्तजुषस्वेति अत्र स्थानानि कल्पयति अग्र
तो ब्रह्मणे कल्पयामि दक्षिणतः स्कंदाय कल्पयामि विनायक कल्पयामि पश्चिमतः स्थूलायकल्पयामुत्त
रतः उमायैकल्पयामि नंदिकेश्वरायकल्पयामीति कल्पयापसाविल्पपात्रमभिमंत्र्य पश्चादास्य त्रिरय पवि
त्रमध्यमानीयसद्रूपवित्रेण दिसंदर्शयेत् ॐ मित्र तमिति स्नानं ॐ स्वरितिरुद्रेण पाद्यं दद्यात् एवेणार्घ्य
अपव्याहृतिभिर्निर्माल्यं व्यपोह्योत्तरतः श्रीउपनम इत्यर्थैर्नत्वापूयित्वा पोहिष्ठामयोभुव इति च तस्रृभि
र्हिरण्यवर्णाश्चयः पावका इतिचतसृभिः पवमानः सुवर्जन इत्येतेनानुवाकेन स्नापयित्वाद्भिस्तर्पयति भ
वंदेवं तर्पयामि शर्वं देवं तः ईशानं पशुपतिं देवं रुद्रं देवं उग्रं देवं भीमं देवं महांतं देवं तर्पयामितितर्पयि

आ॰म॰ त्वाथैतानिवस्त्रयज्ञोपवीतान्याचमनीयमुदकेनव्याहृतिभिर्दत्वाव्याहृतिचदक्षिणा॥उदकं परिषिच्य नमस्ते
॥५३॥ रुद्रमन्यवइतिगंधंदद्यात्सहस्राणिसहस्रशइतिपुष्पंदद्यात्ईशानंत्वाभुवनानामधिश्रियं॥ इतिचाक्षता
न्दद्यात्सावित्र्याप्रदीपंदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांभगवतेमहादेवायजुष्टंचरुंनिवेदया
मितिनैवेद्यं॥ अथाष्टभिर्नामधेयैरष्टौपुष्पाणिदद्यात्भवायदेवायनमः॥ शर्वायदेवायनमः॥ ईशानायदेवाय
नमः॥ पशुपतये॥ रुद्राय॥ उग्राय॥ भीमायदेवायनमो ब्रह्मणेनमो विष्णवेनमः॥ स्कंदायनमः॥ प्रयातुभवानीशःस
र्वलोकनमस्कृतः॥ अनेनेहविषात्पुनरागमनायत्वापुनः॥ संदर्शनायचेति घृतिमार्पयेत्पश्च ग्रावावा
हनविसर्जनवर्जं सर्वंमानसंमहत्स्व वस्त्वास्यपनमित्याचक्षतइत्याहभगवान्बोधायनइति॥ कौर्मेनवि
स्तराधनात्पुण्यंविद्यतेकवैदिकं तस्मादनादिमध्यांतंनित्यमाराधयेद्धरिं॥ अथवादेवमीशानंभगवंतं
सनातनं॥ आराधयेन्महादेवं भावपूतोमहेश्वरं॥ मंत्रेणरुद्रगायत्र्याप्रणवेनाथवापुनः॥ रुद्रगायत्री राम:
तत्पुरुषायविद्महइत्यादि॥ ईशानेनाथवारुद्रत्र्यंबकेनसमाहितः॥ पुष्पैःपत्रैरथाद्भिर्वाचंदनाद्यैर्महेश्व ॥१४३॥

रं॥ तथोनमःशिवायेतिमंत्रेणानेनवाजपेत्॥ नमस्कार्योमहादेवंऋतंसत्यमितीश्वरं॥ तथोनमःशिवाये
तिमंत्रेणानेनवाजपेत्॥ नमस्कार्योमहादेवंऋतंसत्यमितीश्वरंनिवेदया॥ त्त्वात्मानंयोब्राह्मणमिती
श्वरे॥ प्रदक्षिणंद्विजःकुर्यात्पंचब्रह्माणिवाजपेत्॥ ध्यायीतदेवमाकाशंव्योममध्यगतंशिवमिति॥ शिव
वाक्यं स्कांदे॥ विप्रस्यतुसदैवहिंशुचेरप्यशुचैरपिशूद्रस्यचालिंगपूज्यसिमिविप्राणामिवदर्शनात्सहि
पूजां॥ तथापुनःकर्माणियोनित्यंस्वायानिकुरुतेद्विजैतस्याहमर्चांगकां मिचंद्रखंडविभूषिते॥ तथान
मोतेनशिवेनैवस्त्रीणांपूजाविधीयतेएवकारप्रणवसरव्यानार्ध॥ तथान्यसिंहतापनीयेसावित्रीप्रण
वंयजुर्लक्ष्मीस्त्रीशूद्रायनेच्छंति॥ नविद्येपि स्वाहाप्रणवसंयुक्तंशूद्रेमंत्रंददद्द्विजः॥ शूद्रोनरकमाप्नोति
ब्राह्मणःशूद्रतामियात्॥ रुद्रयामलेनप्राचीमपगत॥ शंभोर्नोदीचीत्रिकं संश्रितं॥ नप्रतीचीयतःपृष्ठंमृतोद
क्षं समाश्रयेत्॥ पूजकःशंभोःपूजार्थंप्राचीमवस्थीतुयेनसमाश्रयेत्॥ पूजकःशंभोःपूजार्थंप्राचीमवस्थि
तयेनसमाश्रयेत्॥ पंचवक्त्रपक्षेयतःसंहारकंचवक्त्रंप्राच्यामवस्थितं॥ एकवक्त्रपक्षेतुउत्तरां॥ दक्षिणे

आ·म·
॥५४॥

वादरुद्रलिंगं॥ इदं च वचनं स्वयंपि लिखितद्विविषयमेव बहुसमाणामावरणा पूजाप्येतदनुसारेणैव
पूज्यपूजकांतःप्राथ्यात्तु नायं विषयः॥ वा धान्य लिंगपुराणे॥ विना भस्मत्रिपुंड्रेण विना रुद्राक्षमालया पूजि
तोपि महादेवो न तस्य फलप्रदे॥ तस्मान्मृद्वायिकं तेष्वं ललाटेपि त्रिपुंड्रकं संवत्सरप्रदापे त्रिपुरस्य
वधे कालेरुद्रस्याश्रेणैर्यं तल्लते॥ स्फंदाणो विंदवस्तुरुद्रहह्रयपतनं भुवि॥ स्कांदे॥ पंचवक्त्रस्य रुद्रका
लाग्निनाम नामतः॥ आगम्यागमनं चैव ब्रह्मन्नस्य च भक्षणात्॥ मुच्यते सर्वपापेभ्यो पंचवक्त्रस्य धारणात्॥
ईशानमइति यस्ये कमष्टोत्तरशतं जपाभिवेो भस्मना पुण्डास्य धारणायं विनामंत्रेणायोध नैरुद्राक्षं तु विमा
नवः॥ सपातिकरकं घोरं पापवृद्धिंग्राम्य दृढशोति॥ तत्रैवोक्तेः॥ बोपदेवकृष्णशालकंठदेशोद्दशानपरिमिताम
लकेविंशति देष्टपट्कर्णप्रदेशे करयुगलकृते द्वादशैवंबाह्वोरिदोकलानिनयनयुगलकृतेएक
मेकंशिखायां वक्षस्यष्टाधिकं यः कलयति शतकं स स्वयं नीलकंठं॥ अथ पार्थिवपूजा॥ नंदिपुराणे॥ आ
युष्मान्बलवान्श्रीमान्पुत्रवान्धनसखो वरमिष्टलभेल्लिंगं पार्थिवं यः समर्चयेत्॥ तस्मात्तु पार्थिवं

राम:
॥१४२॥

गलिंगं ज्ञेयं सर्वार्थसाधकं॥ भविष्ये॥ मृद्भस्मगोशकृत्पिंडं ताम्रं कांस्यमयं तथा कृत्वा लिंगं सकृत्पूज्य वसे
त्कल्पायुतं दिवि॥ राज्यवित्तप्रदं लिंगं स्फाटिकं सर्वकामदं॥ नर्मदागिरिजं श्रेष्ठं मन्येदपि हि लिंगवत्॥
कृत्वा पूजयविधे इत्थमस्मेचेहितं फलं लिंगवत्॥ लिंगाकारः॥ तिष्ठितव्यं द्वादशांगुलपरिमाणं न लिंगं
कुर्यात्प्रविन्नरः कुर्वीतं गुप्तस्तोरुस्वं न कदाचित्समाचरेत्॥ अंगुष्ठतलतद्वहत्तपवृयंपित॥ अंगुष्ठं गुलिमा
-नं तु पुत्रपुत्रापदृश्यते॥ तत्र तत्र ब्रह्मत्सर्वयंपितिमिंतु या सदेतिष्ठ देशगपरिशिष्टात्॥ शिवधर्मे सहस्रम
र्चयेल्लिंगं निरयं स न गच्छति रुद्रलोकमवाप्नोति नुकार्णोगानन्वसमान्यतथा वालुकानि च लिंगानि पा-
र्थिवानि च कारयेत्॥ सहस्रपूजनात्सोपि लभते वांछितफलं॥ देवपुराणे॥ द्वादहरणं संघटप्रतिष्ठाह्वान
मेव च स्थापनं पूजनं चैव विसर्जनमतः परं॥ हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक्॥ पशुपतिः शिवश्चैव
महादेव इति क्रमात्॥ अत्रानुष्ठानं॥ ॐ हराय नमः॥ इति मृदाहरणं॥ ॐ महेश्वराय नम इति संघटनं॥ ॐ शू
लपाणे इह सुप्रतिष्ठितो भवेति प्रतिष्ठा॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं रत्नाक-

आ॰म॰

॥५५॥ सोम्यलिंगं परमसुभगवरानीतिहस्तं प्रसन्नं ॥ पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वा
द्यं विश्ववीजं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं ॥ इति ध्यात्वा पिनाकधृगिहागच्छेत्यावाह्य ॐ पशुपतये
नमः इति स्थापनं ॥ एतस्माद्यं ॐ नमः शिवाय नमः इति एवमष्टाभिर्नामभिः पूजयेत् ॥ विसर्जनात्पूर्वं भविष्यत्पु
राणोक्तस्वभावप्रसिद्धे ॥ शान्यादिपूर्वदिपूर्वदिपूर्वदिक्षु वामावर्तेन पूजनं ॥ यथा ॥ ॐ शर्वाय क्षिति
मूर्तये नमः ॥ ॐ भवाय जलमूर्तये नमः ॐ रुद्राय अग्निमूर्तये नमः ॥ ॐ उग्राय वायुमूर्तये नमः ॥ ॐ भीमाय
आकाशमूर्तये नमः ॥ ॐ पशुपतये यजमानमूर्तये नमः महादेवाय सोममूर्तये नमः ॥ ईशानाय सूर्यमूर्त
ये नमः ॥ मूर्तयो ह्यष्टौ शिवस्यैता ॥ पूर्वादिक्रमयोगतः ॥ आग्नेय्यंता ॥ पूज्योऽस्मात्तु वेद्यां लिंगे शिवं यजेत् ततो म
हादेव स्नानस्वेति मंत्रस्तुत्या विसर्जयेदिति भविष्यपुराणे ॥ ॐ नमो हिरण्यबाहवे बलिपुष्पं निवेदयेत् ॥ ॐ राम:
योनमः ॥ शिवायेति मंत्रः ॥ सर्वार्थसाधकः ॥ सर्वमंत्राधिकश्चायमोंकाराद्यः षडक्षरः ॥ तन्मंत्रजापी तत्क
र्मरजस्तत्तन्मनसः ॥ निष्कामः पुरुषो राजन्सरुद्रं परमेश्वरं ॥ पंचाक्षरः ह्युपक्रमः भविष्ये ॥ स्य ॥२४२॥

वित्रपवित्रो वा सर्वावस्थां गतोऽपि वा ॥ महापातकसंयुक्तो मंत्रस्यास्य जपे यथा ॥ अधिकारो भवेत्सर्वतः श्री
वेदेष्वपि च वा इति तस्मार्थ ॥ पूर्वोक्तप्रकारं दद्यात्तु रोधात ॥ यथाधिकारी भवेत्तथा ॥ ब्रवीति पर्षः ॥ तथा
सर्वेषामेव यात्रायां गां वरं पात्रे महेश्वरः ॥ प्यःतं तन्नाप्यते यस्मादतीव नरकाग्निवात् ॥ शिवमुद्दिश्य यत्तदं
तं सर्वकारणकारणं ॥ तदनंतफलं दातुं भवति ॥ तिकिमद्भुतं ॥ दत्वाने वेद्य वस्त्रादीन् ॥ नारदीतकदाचन
त्यक्तव्यं शिवमुद्दिश्य तदा दानेन तत्फलं स्याद्दानेयह रो ॥ शिवधर्मो तस्मात्पुष्पैः फलैः पत्रैस्तोयैरपि च
यत्फलं ॥ तदनंतफलं ज्ञेयं भक्तिरेवात्र कारणं ॥ तत्रैव लिंगानुलेपनं कार्यं दिव्यगंधैः ॥ सुगंधिभिः वर्ष
कोटिशतं दिव्यं शिवलोके महीयते ॥ शिवधर्मे तस्मात्पुष्पप्रदानेन लिंगे पुष्पतिमस्तु च ॥ स्वप्नोति वर्ष
कोटीनां उगोति नरो व्रजेत् ॥ स्कांदे ॥ स्कांदस्य काण्डपि च पन्नारो ॥ शाकल्पसमं देवं हि प्रदातव्यानि तेषु
ष ॥ भविष्ये ॥ धत्तूरकौश्मयेलिंगं संस्थापयते नरः सुगो दानफलं प्राप्य शिवलोके महीयते ॥ बिल्वपत्रै
नरवं हैम्बयोलिंगं पूजयेत्सकृत् ॥ सर्वपापविनिर्मुक्तो शिवलोके महीयते ॥ तथा सर्वकामप्रदं बिल्वं हरि

श्रा.म:
॥५६॥ शस्यविनाशनं बिल्वपत्रात्परं नास्ति येन तुष्यति शंकर तथा केतकी कोटादिशानि निःशिष्यर्युषितानि च स्वयं
पतति पुष्पाणि स्पृजे पुरुहस्तातान्यपि तथा देवदारु सम्मे तच सर्जश्रीवासकं दृतं श्रीफलं वास्तसमिश्चद
ग्धाश्रेति पुराणगतिः सर्जः शालरसः श्रीवासः सरलद्रवः कुंदुरः शैलेयमिति स्मार्त्त साचकी नियासइति रामो
दर. एभ्यः सौगंधिकं धूपं षड्रस हस्वगुणोत्तरं अगुरुं घातसहस्रं हि गुणं त्वाघुनं गुग्गुलुं घृतसंयुक्तं सा
ज्ञागुला तिशंकरः तथा तैलेनापि विहितो यो दद्यात् घृताभावे न मानव ते न दीपप्रदानेन शिवश्चर्म्यते नृवि
नं दिके श्वरे स्वयं नैनपाशिवं पूज्य नैवेद्य मुपकल्पयेत् यद्देवात्मन श्रेयस्त हीशाय प्रकल्पयेत् न
विद्ये शालितंडुलप्रस्थं तु कुर्यादिन्नं समुष्कृतं शिवायतं चरुं दद्यात् चतुर्दर्द्रुपासमाहितः शैवसर्वस्वस्कां
दे एकमात्रफलं पद्मकय शंभो विनिवेदयेत वर्षाणामयुतं भोगी शिवलोके महीयते एकं मोफलं प
द्मकयः शिवाय विनिवेदयेत् सर्वभक्ष महाभोगी शिवलोके महीयते एकमोफलं पद्मकयः शिवाय विनि राम:
वेदयेत् सर्वभक्षमहाभोगी शिवलोके महीयते मोचाकदलानि शिवपुराणे नैवेद्यं घृतसंयुक्तं मधुपक्कं ॥२५५॥

निवेदयेत् ॥ अग्निष्टोमस्य यज्ञस्य फलमाप्नोति मानवः ॥ परिपक्कं तु संस्कृष्टं आज्यं सिक्तं सिक्तं सुसंस्कृतं शिवा
य मासं दत्वा तु षण्मासु यत्फलमाप्नुयात् ॥ अशेषफलमादानेन यत्फलं परिकीर्तितं ॥ तत्फलं प्राप्नुयान्नित्यं स
र्वमासं निवेदयेत् ॥ शिवधर्मो लिंगवेदी भवेद्देवी लिंगं साक्षान्महेश्वर ॥ तयोः संपूजनात्स्यातां दे
वी देवस्य पूजितौ देवीपुराणे सद्यः च ततः तौ सव्यं प्रणामं नैव लंघयेत् ॥ एकान्तमना तिष्ठेय कुर्या
त्रिः प्रदक्षिणं छिन्नस्तेन नवे द्रूषितं नतस्य पुनरुद्भवः ॥ भविष्ये ॥ जानुभ्यां चैव पाणिभ्यां शिरसा च विचक्ष
णः कृत्वा प्रणामं देवेशं सर्वान्कामानवाप्नुयात् ॥ लिंगपुराणे ॥ गंध धूपनमस्कारैस्तु स्ववाचैश्च सर्वशः ॥
यो मां समर्चयेत्तत्र तद्दातुष्याम्यहं सदा महाभारते सर्वभक्षणहीनो पियुक्तो वा सर्वपातकैः ॥ स्ववीर तितं
त्यापं नावयं शिवमात्मना ॥ राघवभट्टधृतं न्यर्धोमुखे वामहस्तेनु दास्यदक्षहस्तकं द्विसंगुलीरंगुली
भिः संयुज्य परिवर्जयेत् प्रोक्तास्तं हास्तु यर्पणोतु प्रशस्यते न्यर्पणेन्यात्मनी तिशेषः स्कांदे ॥ निर्माल्यं यो
हि मनुजो शिरसा धारयिष्यति न्मुच्चिर्न्निन्न मर्यादो न नः पापसमन्वितः ॥ नरके पच्यते घोरे तिर्यग्योनौ च सं

ग्रा·म·
५१

नवे ब्रह्महापि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत् तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते। शुचित्वा नारदेनेत्य
र्थः। एवं च स्पर्शात् दृश्य निर्माल्यं सवासा आप्लुतः शुचिः। इति कालिकापुराणे यमस्तु चिविषयं। अनुप
नीनविषयं वेति स्मार्त्त बहूचगत्यपरिशिष्टे। अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलं। शालग्रामशिलास्प
र्शात्सर्वं याति पवित्रतां। कौर्मे लिंगपूजायां गुणफलसंबंधः। लवणेन च सौभाग्यं पार्थिवं सर्वकामि
कं। अनेकफलदं भूरि मैकतं परिकीर्त्तितं। यामद्वितिलपिष्टोत्थं तु चोत्यमारणे स्मृतं। गंधोत्थमन्नदं प्रोक्तं कुं
डोत्थं शांतिवर्धनं। गंधोत्थं गुणदं भूरि शर्करोत्थं सुखप्रदं। वंशांकुरोत्थं वंशाप्त्यै गोमयं सर्वरोगहृत्। वेणुपा
ष्टिसंभवं लिंगं सर्वशत्रुविनाशनं। आसुरीलवणोत्थं तु सर्वलोकवशीकरं। सौभाग्यजननी पिष्टसंभवं लि
गमुत्तमं। तंडुलोद्भवपिष्टस्य लिंगं सर्वस्वनप्रदं। दधिदुग्धोद्भवं लिंगं कीर्तिलक्ष्मीसुखप्रदं। धान्यदं धा
न्यजं लिंगं कीर्तिश्रीमान्यवर्धनं। दूर्वागड्ड्वासंभूतमपमृत्युनिवारणं। इक्षुदंडोद्भवं लिंगं सुखवृद्धनक रामः
रं परं। आगमोक्तनियोगं तु ज्ञात्वा सम्यग्विचक्षणः। वस्तुमात्रस्य कुर्वीत लिंगं तत्तत्फलाप्तये। वांछाविश ।१४५।

प्रदं लिंगं स्फाटिकं सर्वकामिकं। विद्याप्रदं लिंगसाहस्रं कन्याप्रदं तु शतत्रयं पुत्राप्त्यै सार्द्धसाहस्रं का
पी शतपंचकं सुरूकामः सहस्रं तु वस्त्राप्त्यै शतमष्टकं। उच्चाटनपरं चैव मध्येर्कं च सहस्रकं मारणा
र्थं सप्तशतं मोहाय शतमष्टमं। स्तंभने तु तथैव मणे तु नर्धकं। निगडान्मुक्तिकामस्तु समस्तं तु समाचरेत्।
महाराजभये पंचसहस्रं सर्वकामदं। एकं पापहरं प्रोक्तं द्विलिंगं कार्यसिद्धिदं। त्रिलिंगं सर्वकामानां
मारणे परमाद्भुतं। लिंगानामयुतं चापि महाराजभये चरेत्। कारागृहविमुक्त्यर्थमनंतं कारयेद्बुधः। डा
किन्यादिभये शाप्ते सहस्रं कारयेत्। दशसहस्राणां पंचकं तु पुत्रकामेन कारयेत्। कृत्वानितं विधानेन
सगुणं पुत्रमाप्नुयात्। इतिलक्षमेकं तु लिंगानां यः करोतु नरोत्तुवरो नु विशिव रावन वेदे त्रियं तस्य नान्यका
र्यविचारणात्। इति शिवागमे लिंगविधाने चमत्कारचिंतामणौ ॥ नात्पागृहे स्मजामुत्तिष्ठवतु
रं गुल्यतोधिका। न वितस्त्यधिका धातु संच वा श्रेयइच्छता। पंचसूत्रं लिंगमित्यंत शेरवरे। लिंगमस्तकं
विस्तारं पूजायोगसम—येत्। नाहतं त्रिगुणं कुर्यात् नाहवत्पाद विस्तृतं। पूजांशं त्रिगुणं कुर्याद्वृत्तं पीठ

मुत्तमं वृत्तं वा चतुरस्रं वा मध्येकं ठमसमन्वितं द्विगुणं लिंगनाहाच्च कंठं नाहं समाचरेत् त्रिमेखलमध्य
स्थो ईसिमं चार्घद्विमेखलं लिंगमस्तकविस्तारं षड्भागं विभजेत्तत मेखलामेकभागेन कुर्यात्तां तं चूतसमं
लिंगदैर्घ्यसमं कुर्यात्प्राणालं पीठवाह्यतः विस्तारं तत्समं मूले तदर्द्धं च तदग्रतः जलमार्गः प्रकर्तव्यस्त
स्य मध्ये त्रिभागतः कुर्यात्पीठं वा धर्दी घी वा प्रमाणं च त्रिवागमादिति पूज शालाकाध्यायोग उद्धृता नाह
:पुष्टतातात्त्रयमाश्रय लिंगमसस्तकव्यासोच्चतामः व्यासत्रिगुणो नाहः तावानेव पीठव्यासः पीठं चवृ
त्तं चतुरस्रं वा प्रणालिका च लिंगव्यासो नववन्मूले विस्तृता अग्रे तदर्द्धांत द्विगुणा सार्द्धा नादीर्घेति
चंद्रिकायां इति देवपूजा मात्स्ये तत्रोपदेष्टारमपि पूजयेच्च ततो गुरुं न पूज्यते गुरुर्यत्र नरैस्तत्राफ
लाः क्रियाः शैवपुराणे वस्त्राभरणमाल्यानि गायनान्यासनानि च प्रियाणि वात्मनो यानि तानि देया
नि वै गुरोरिति इति गुरुपूजा अथ वैश्वदेवविधिः नृसिंहपुराणे पौरुषेण च सूक्तेन ततो विष्णुं समर्चये
त् वैश्वदेवं ततः कुर्याद्बलिकर्म तथैव चेति शातातपः वैश्वदेवः प्रकर्तव्यः पंचसूना पनुत्तये इति सूना राम:

हिंसा स्यालं यमः पंचसूना गृहस्थस्य वर्तंते हरहः सदाः खंडनी पेषणी चूल्ली जलकुंभ अवस्कर इ
ति उलूखलमुसलादि अवस्कर उत्करः उपस्करपाः इति पावेश्च शूर्पचालन्यादि इह वसिष्ठः अन
ग्निकः स्तु पो विप्र सोन्नं व्याहृतिभिः स्वयं कृत्वा शाकलमंत्रैश्च शिष्टं कृतबलिं हरेत् अवग्निको भार्या
भावेन यो तस्मात्तौ अग्निपरिग्रहाधिकरः स्मृत्यः कर्मप्रदीपे अग्न्यादिर्गौतमेनोक्तो होमः शाकल एव च
अनाहिताग्नेरप्येष युज्यते बलिभिः सह अस्माद्दिरग्निवाग्वादिदेवत्य न्त्रादिव्याहृतिभिकरणकः
अपि रेव कारार्थो विष्णुः अन्नं व्याहृतिभिः कृत्वा पूजयेदिति षितर प्रजापतिर्हविरिति प्रजापतयेस्वाहे
ति कृत्वेतत्पर्य पूजयेदिति तु स्वलाल्लीन मनुष्ययज्ञानुवादमात्रं न तु होमांतरं तद्विधिः ज्योतिष्टोमे शा
लकहोमं गंन्हताद्देवकृतैस्यैनसो वयजन्मसीत्यादयः षट् शाकलमंत्राः कातीयानां प्रसिद्धा आश्वला
यनाः अथ सायं प्रातः सिद्धस्य विष्यस्य जुहुयात् अग्निहोत्रदेवताभ्यः सोमाय वनस्पतयेग्नीषोमाभ्यामिन्द्रा
ग्निभ्यां द्यावापृथिवीभ्यां धन्वंतरय इंद्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे स्वाहेति सायं शाकरात्रि परः प्र

आ.म.

५९

नंतरः शाखोक्तहयरा मिश्रस्य पक्षस्य अग्निहोत्रदेवताभ्य इति सायमग्निः प्रातः सूर्यः प्रजापतिरुभय
त्र सोमाय वनस्पतिः इत्येकाकृति व नस्य शाखस्य यौगिकत्वेन विशेष्याद्येषु त्वेना समासस्येसन्निहित
सोमपदान्वयात् त्वाष्ट्रं पाली वनमाख्नेतेत्यत्र पालाव तत्र दृष्यन्वाष्ट्पदान्वय अग्निर्बृहस्पतिः सो
मो वनस्पतिरितित्यादौ वनस्पतेर्गुणत्वदर्शनाच्च विश्वेभ्यो देवेभ्य इत्येकैवाकृतिः विश्वनाम्नः सर्वना
म्नो बुद्धिस्थापेक्षत्वेन सन्निहितदेवताद्यन्वयात् एवं दशाकृतयो भवंति द्वित्रिकृतो नारायणस्यापि
यमेवाशयः इत्येषदेवयज्ञः एतयज्ञमाह स एव अपमलिहरणमेताभ्य एवं देवताभ्योद्भ्य ओषधि
वनस्पतिभ्यो गृहाय गृहदेवताभ्यो वास्तुदेवताभ्य इंद्रायेंद्रपुरुषेभ्यो यमाय यमपुरुषेभ्यो वरुणाय वरु
णपुरुषेभ्यः इति प्रतिदिशं ब्रह्मणे ब्रह्मपुरुषेभ्य इति मध्ये प्राक् विश्वेभ्यो देवेभ्यः सर्वेभ्यो दिवाचारिभ्य इति
वानेक्तंचारिभ्य इति नक्तं रक्षोभ्यः इत्युत्तरतः अस्यानंतरं एताभ्यः पूर्वोक्ताभ्यो दशाभ्यः चकारो वृत्त राम
माणसमुच्चये उदगंतं प्राद्यदेरितिपुरुषेभ्यो बलिहरेदिति कात्रिकोक्तेः इंद्रादिप्रधानदेवतोत्तरस्वाग्र

१५१

तत्पुरुषेभ्यो बलिः पूर्वोक्तदशाकृती देवताकान्न बलं प्राप्तं स्यान्न दत्वा किंचित्स्थलं त्यक्त्वा इत्यादिभ्यो ब-
लिं दत्वा तराले प्रामादिषु इंद्रादिभ्यस्तत्पुरुषेभ्यः अदत्वा तन्मध्ये एव ब्रह्मणे तच्चतुर्दिक्षु ब्रह्मपुरुषा
दिभ्यो दद्यात् प्रथमं दिवाचारिभ्यो वसुक्ते वैश्वदेवः प्रातः सूरभ्य इति वृत्तौ इति भूतयज्ञः पितृयज्ञमा
ह स्वधा पितृभ्य इति प्राचीनावीती शेषं दक्षिणा निनयेत् शेषस्य हरणदानंतर्य परत्वयुक्तं च द्रव्यं लभ्यते
द्रव्यं देवतासंयोगात् मितोयागः तेन च स्विष्टकृदादि द्रव्यद्रदृष्टमप्यत्रास्ति एतावस्टे स्विष्टकृति मंत्रतुपु
रुषार्थं श्राद्धं वापि यज्ञः स्यात्पित्र्यो बलितथापि चेति मनुना पितृतर्पणार्थरूप पितृयज्ञस्य कर्तव्यकर्तव्यं-
स्योक्तत्वात् दक्षिणा दक्षिणस्यां दिशि दक्षिणादात् इति पितृयज्ञः इदमेव कर्मत्रयं वैश्वदेवशब्दवाच्यं
देवभूतयज्ञयोर्विश्वेदेवसंबंधेन तत्र रव्यन्यायात् पितृयज्ञस्य तच्छेषप्रतिपातकत्वेन तदंगत्वाच्च
कारिका गृहस्थो वैश्वदेवाख्यं कर्म प्रारभते दिवा तंत्रं नास्त्यत्र भगवद्वृत्तिकारवचो यथा औपास
नाग्निमन्वं वा समिध्याय हविर्जुजं पर्युक्ष्य परिषिच्याग्निं अलंकृत्य पूर्ववत् हविष्यपक्वमादध्यादधि

आत्मानं च सेचतत् प्रोक्षोदास्य घृताभ्यक्तं कृदिमयं निधाय चक्र त्वा हस्तेन सूर्यायेत्यादिभिस्तनः प्रजा
पतिर्यदस्योक्तिर्वैश्वदेवे मनुस्मतिपर्युदृनौक्षणौ कुर्यान्देवयज्ञोयमिरितः एतैस्तु विबलान्दत्वाथ
कत्स्यान्नानि निरंतरान् सुक्कांतरालं ग्राकस्थानाभ्यत्यादिभिर्हरेत् इहापि नवतिस्वाहाकारेण नरोनपि
ष्टयज्ञके अभ्याकृताकूलेः प्रत्यगिन्द्रायेति बलिं हरेत् इन्द्रकूले रिन्द्रपुरुषेभ्यो बलिं हरेत् यमायेत्यंतरा
लस्य हरेद्दक्षिणतो हसिं यमाकूले तद्ग्रामपुरुषेभ्यो बलिं हरेत् प्राग्वा ब्रस्नणे बुले कृत्वा वरुण
येति मंत्रितः तस्मादुदक तु वरुणपुरुषेभ्यो बलिं हरेत् सोमायेत्यंतरालस्य हरेदुत्तरतो बलिं सौम्याद्व
जेन इकसोमपुरुषेभ्यो बलिं हरेत् जयंतस्त्वादौ तैर्बलीन् दत्वा निरंतरान् सुक्कांतरालमिन्द्रादिद्विवो
वार्नो बलीन् हरेत् इंद्रादिबलितः पूर्व प्राच्यास्यात्पौरुषो बलिस्त्वंतराले बलीन् दत्वाग्निशेषैर्मंत्रैर
तः परं रक्षोभ्य इति सर्वस्माद्वलिं तु नरतो हरे भूतयज्ञो यमुदितः प्राचीनावीतिस्यतः परं स्वधा पितृभ्य
इत्युक्त्वा दक्षिणस्यां तु निवपेदिति अयं च नराकाराः संपद्यते चक्राकारमप्याह सौनकः चक्राकारे

राम:
॥ १५८ ॥

णयो प्रः सदा भूतबलिं हरेत् सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयादिति ॥ अथ गृहबलिः शौनकः देवय
ज्ञान्नशेषात्तु गृहद्वारादिषु क्षिपेत् चंडालपतितादिभ्यो भूतयज्ञान्नशेषतः ॥ पितृयज्ञान्नशेषेण वाय
सेभ्यो बलिं हरेदिति ॥ गृह्यपरिशिष्टे ॥ अथास्य शेषेण गृहदेवतानां बलिं द्वारि पितामहायः स्रक्कीले
रुमाय गृहत्वाच्यादि प्रतिदिशं सनवय्य हायेंद्राय यमविष्णुभ्यां स्कंदवरुणाभ्यां ॥ सोमसूर्याभ्यां मश्विभ्यां
वसुभ्यो नक्षत्रेभ्यो यमध्येवास्तोष्पंतये ब्रह्मणे प्राणादिभिः तिसृभिर्जेष्टु सिध्यै द्वे श्रियै कीर्त्यै वरुणायेह
धानेभ्योऽद्भ्यां रक्षस्पतये द्यावापृथिवीभ्यामुलूखलमुसलयोरप्य निक्रम्य भूमा च पि ॥ आसिच्यप
चां डापतितभूतवायसेभ्यो श्वभ्यो मौविकरेद्ये भूताप्रचरंति दिवा बलिमिच्छंतो विद्वरस्य प्रेष्टा तेभ्यो बा
लिं पुष्टिकामो दद्या प्रिमयि पुष्टिं पुष्टिपतिर्ददात्विति रात्रौ चेन्नक्तं बलामिति ॥ कूर्ययस्य प्रज्ञानित पापि
पाद आतस्तांतात्तृप्यि वमेतरिद्धमि तिजस्वान्या विच स्वस्त्ययनानि ततो मनुष्ययज्ञपूर्वकं भुंजीतेति ॥
इति वैश्वदेवविधिः ॥ अथ मनुष्ययज्ञः मनु ॥ अतिथिभ्योन्नदानं तु नृयज्ञः सतु पंचम इति ॥ मार्कंडेयु

आ॰ म॰

॥६१॥

रागे। आचम्य च ततः कुर्यात्स्वाङ्गे द्वारवलोकनं। मुहूर्तस्याष्टमं भागमुदीक्ष्योह्यतिथिर्भवेत्। न मित्रम
तिथिं कुर्यान्नैकग्रामनिवासिनं। अज्ञातकुलनामानं तत्कालेसमुपस्थितं। बुभुक्षुमागतं श्रान्तं याचमा
नमकिंचनं ब्राह्मणं प्राहुरतिथिं संपूज्यः शक्तितो बुधैरिति। कौर्मे हितकारमप्यन्नं वा निःस्वावाराक्तितो द्वि
जः। दद्यादतिथये नित्यं बुध्येत परमेश्वरमिति। अतिथिपरमेश्वरभावयेदित्यर्थः। मनुः यासमात्रं भवे
द्भिक्षाग्रं ग्रासचतुष्टयं। अग्रं तु गुणितं स्यात् हंतकारो विधीयत इति पाराशरः दद्याद्भिक्षात्रितयं पा
रिव्राट्ब्रह्मचारिणो इच्छया च ततो दद्याद्विभवे सत्यवारितमिति। माधवीये पुराणे यत्फलं सोमयागेन प्राप्नो
ति धनवान्द्विजः। सम्यक् पंचमहायज्ञैर्दरिद्रस्तदवाप्नुयादिति। व्यासः पंचयज्ञांस्तु यो मोहान्न करोति
गृहाश्रमी। तस्य नायं च परो लोको भवति धर्मतः इति। अथ कात्यायनीये वैश्वदेवानुष्ठानप्रयोगः। पंचम-
हायज्ञनिमित्तं मात्र प्रजापूर्वकं मासादयिकश्राद्धं कृत्वा वैश्वदेवार्थं पाकं विधाय समुद्धृत्याभिघा
यपश्चाद्दग्नेः प्राङ्मुखः पवित्रपाणिर्दक्षिणं जान्वाच्य मणिकोदके नाग्निपर्युक्ष्योदनमादाय ब्रह्मणे स्वा रामः

॥२४९॥

हा। इदं कश्यपाय अनुमतये स्वाहा। इदमनुमतये इति पं॰ ब्रह्मणे प्रजापतये स्वाहा इदं प्रजापतये। गृह्याभ्य
ः स्वाहा। इदं गृह्याभ्यः कश्यपाय स्वाहा। इदं कश्यपाय। अनुमतये स्वाहा। इदमनुमतये इति पंचाहुतीर्हु
त्वा मणिकसमीपे उत्तरेणान्नेन पर्जन्याय नमः। इदं पर्जन्याय। अद्भ्यो नमः। इदमद्भ्यः। पृथिव्यै नमः। इदं पृथिव्यै। इति
प्राक्संस्थमुदक्संस्थं वा बलित्रयं दत्वा दक्षिणोत्तरयोर्द्वारशाखयोः यथाक्रमं धात्रे नमः। इदं धात्रे। विधात्रे नमः। इ
दं विधात्रे इति बलिद्वयं दत्वा। प्रागादिक्रमेण वायवे नमः इदं वायवे इति प्रतिदिशं बलिचतुष्टयं दत्वा। प्राच्यै दिशे
नमः। इदं प्राच्यै दक्षिणायै दिशे नमः इदं दक्षिणायै दिशे प्रतीच्यै दिशे नमः। इदं प्रतीच्यै उदीच्यै दिशे नमः। इदमुदीच्यै
इति दिग्भ्यश्च बलिं दत्वा तदुत्तरतो विश्वेभ्यो देवेभ्यो नमः इदं विश्वेभ्यः विश्वेभ्यो भूतेभ्यो नमः। इदं विश्वेभ्यो भूते
भ्यः। इति × तदंतराले ब्रह्मणे नमः इदं ब्रह्मणे अंतरिक्षाय नमः इदमंतरिक्षाय। सूर्याय बलित्रयं दत्वा॥ बलिद्व
यं दत्वा तयोरप्युत्तरतः। उषसे नमः इदमुषसे। भूतानां पतये नमः। इदं भूतानां पतये च इति बलिद्वयं दत्वा ब्रह्म
णो बलीनां दक्षिणतः। प्राचीनावीती दक्षिणामुखः पितृभ्यः स्वधा नम इति मंत्रेण पात्रावशिष्टान्नेनैकं बलिं द

आ.म. लापात्रीप्रक्षाल्य यस्यैतन्नेनिर्णेजनं न इति निर्णेजनजलं वायव्यां दिशि पूर्वक्षेपेदं यक्ष्मणे इत्यक्षाः। ऐंद्रवारुणवायव्या
६२ :सौम्यावैनैरृती स्तथा। वायसाः प्रतिगृह्णंतु भूमौ पिंडं मयार्पितं इदं वायसेभ्यः। द्वौ श्वानौ श्यामशबलौ वैवस्वत
कुलोद्भवौ। ताभ्यां पिंडं प्रदास्यामि स्यातामेवाविहिंसकौ इदं श्वभ्यः। देवा मनुष्याः पितरो वयांसि सिद्धा यक्षो
रगदैत्यसंघाः प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छंति मया प्रदत्तं इदं देवादिभ्यः। पिपीलिकाः की
टपतंगकाद्याः बुभुक्षिताः कर्मनिबंधबद्धाः। तेषां हि तृप्त्यर्थमिदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवंतु इदं पि
पीलिकादिभ्यः इति काकादिबलिं तु बहिर्दत्वा पादौ प्रक्षाल्याचम्य। तिथिं चात्र मोपादप्रक्षालनपूर्वकं ग
धमाल्यादिभिरभ्यर्च्यान्नं परिविष्य हंत तेन्नमिदं मनुष्यायेति संकल्प्य दद्यादिति का। इति कात्यायनवैश्वदेवः
इति पंचमहायज्ञाः। अथ भोजनं व्यासः। पंचार्द्रो भोजनं कुर्यात् प्राङ्मुखो मौनमास्थितः हस्तौ पादौ तथैवास्य
मेषु पंचार्द्रता मतेति। आश्वमेधिके आर्द्रपादस्तु भुंजीयात्प्राङ्मुखश्चासने शुचौ पादाभ्यां धरणीं स्पृ राम:
ष्ट्वा पादेनैकेन वा पुनरिति बौधायनः उपलिप्ते समे स्थाने शुचौ श्लक्ष्णसमन्विते चतुरस्रं त्रिकोणं च व ९५०

र्तुलं चार्द्धचंद्रकं कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलं पैठीनसिः। सौवर्णे राजते ताम्रे पद्मपत्रे पलाशयोः। भा
जने भोजनं कुर्वन् त्रिरात्रफलमश्नुते एक एव तु यो भुंक्ते विमले कांस्यभाजने चत्वारि तस्य वर्द्धंते। आयुः प्र
ज्ञा यशो बलमिति पद्मपलाशपत्रे च यतिगृहस्थभिन्नपरं। ताम्रपात्रे न भुंजीत भिन्नकांस्ये म
लाविले। पलाशपत्रेषु गृही भुक्त्वैंदवं चरेत्। ब्रह्मचारी यतीनां तु चांद्रायणफलं भवेदिति वृहन्मनुः। व्यासो
क्तेरिति मदनाः। पलाशो वल्लीपलाश इति स्मृत्यर्थसारे। कांस्यपात्रं गृहीमात्रपरं तांबूलाभ्यंजनं चैव
कांस्यपात्रे च भोजनं यतीनां ब्रह्मचारी च विधवा च विवर्जयेदिति प्रचेतोक्तेः। पात्रं प्राणाहुतिगृह
णोत्तरं येन त्याज्यं स्याप्यन्यस्तपात्रे तु भुंजातपंचेयासास्त्र हामुने शेषमु ह्यस्मभोक्तव्यं पितृर्यन्नचैव रेरि
ति व्यासोक्तेः। न्यस्तपात्रो न्यस्तपात्रः उच्छिष्टं त्वादौ स्थाप्य। पितृर्यैर्भ्राद्धे भूमितो नोद्धरेदित्यर्थः। इति
मदनाः। तथा ब्रह्मपुराणे पितृकर्मणि भुंजानो भूमौ पात्रं न चालयेदिति। तत्रैव अन्नं दृष्ट्वा प्रणम्यादौ
प्रांजलिः कथयेत्ततः। अस्माकं नित्यमस्त्वेतदिति भक्त्याथ वंदयेदिति। गोभिलः। अथ प्रातः प्राणाहुती कुर्यात्

।व्याहृतिनिर्णयश्चाग्निमंत्रकृतं त्वा सत्येनापरिषिंचामीति सायं सत्यं त्वर्तेन परिषिंचामीत्यादि त
दनंतरं कृत्यमुक्तं भविष्यत्पुराणे भोजनात्किंचिदन्नार्यं धर्मराजाय वै बलिं दत्वाथ चित्रगुप्ताय प्रेतेभ्यश्चे
दमुद्धरेत् यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनां प्रेतानां तृप्तये ह्यन्नमिदमस्तु यथासुखमिति तदनं
तरं कृत्यमाह याज्ञवल्क्यः अपोशानेनोपरिष्टादधस्तादश्नता तथा अनग्नममृतं चैव कार्यमन्नं द्विजा
तये कौर्मे अमृतोपस्तरणमसीत्यपोशानक्रियां चरेदिति शौनकः स्वाहांताः प्रणवाद्याः स्वनाममंत्रा
श्चपंचवा तर्जनीमध्यमांगुष्ठलग्ना प्राणाहुतिर्भवेत् मध्यमानामिकांगुष्ठैरपाने जुहुयात्ततः कं
निष्ठानामिकांगुष्ठैर्व्याने च जुहुयात्ततः तर्जनीं तु बहिः कृत्वा उदाने जुहुयाद्धविः समाने सर्वहस्तेन मुद्र
याहुतिर्भवेत् जिह्वयैव ग्रसेदन्नं दशनैर्न संस्पृशेत् इति जिह्वायस्मे च विशेष उक्तः आप्यमेधिकेय
पारसन्नजानां निजिह्वा पर्णकुतोऽन्नपतया समहितः कुर्यात्प्राणाहुतिमंतं प्रति इति विष्णुपुराणे अ
श्नीयात्तन्मना भूत्वा भुंजीत मधुरं रसं लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः प्राग्द्रवं पुरुषोऽश्नी

यान्मध्ये च कठिनाशनः अंते च द्रवाशी तु बलारोग्यैर्न मुंचति अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनो द्वा
त्रिंशत्तु गृहस्थस्य ह्यमितं ब्रह्मचारिण इति वृद्धमनुः भोजनं तु निःशेषं कुर्यात्प्राज्ञः कथंचन अन्यत्र दधि
सक्त्वाज्य पललक्षार मधुप इति पललतिलगुडमिश्रचोदनं मनुः सायंप्रातर्द्विजातीनामशनं श्रुतिचो
दितं नांतरा भोजनं कार्यमग्निहोत्रसमो विधिरिति अत्र पूर्वार्धे कालद्वयविशिष्टभोजनक्रियाया एव निय
मविधिः षोडशस्तु निशास्त्रीणां तस्मिन्युग्मासु संविशेष्ट भोजनक्रियाया एव नियमविधिः षोडशस्तु निशा
स्त्रीणां तस्मिन्युग्मासु संविशेदितिवत् अत एव सत्यां बुभुक्षायां सति चान्ने भोजनमकुर्वन् प्रत्यवैतीति विज्ञा
नेश्वरः सायंप्रातरेतिकालांतरपरिसंख्येति हरदत्त इयं च तदुपपत्तिः तेयं त्रिदोषा कालांतरस्याविध्यत्वे
त्वेन शास्त्रप्राप्तत्वाभावात् पंचपंचनखा भक्ष्या इत्यत्रेव तत्र ग्राम्यादिनिवृत्त्यादि पंचनखभक्षणस्य
रागप्राप्तत्वेन तद्बाधेऽपि दोषाभावात् स्वार्थहानिपरार्थकल्पनादोषत्रयवती च परिसंख्या तु नांतरेतावदेकवाक्य
तानुरोधेनांगीकार्या भोजनात्पुत्रः कल्के शौ ग्निमादधाते त्यत्रवयोविशेषस्य ऽर्थमं तवेदिमिनोत्यर्द्ध वा

स्मा.म.
॥६४॥

हिर्वैदीत्यत्र च संधिदेशस्य लक्षणा वाक्यभेदश्च नियात न्वतत्रतंत्रे सायंप्रातर्भुंजीतेति चेति नियमविधौ हि
मध्येपि भोजनस्य प्राप्तत्वेन तन्निषेधार्थं पूर्वं नांतरेत्यादि स्यात् वाक्यं स्यादिति चेन्न तत्तु वेनांतरेत्यादिकमेव
विधिद्वयप्रयुक्तत्वादंतरालकालनिषेधकं पूर्वार्द्धं त्वर्थवादोस्य पादस्थ तज्ज्ञातावेव सायंप्रातः शाखांतर
शाखार्थनिरपेक्षो मंत्रे दिग्धेषुवा कप शेषादितिन्यायात् जामि वा एतद्यज्ञस्य क्रियते यदन्वचौ पुरोडाशावु
पांशु यजतीत्यत्रैवांतरे शाखास्य पुरोडाशाविति एवं च सायंप्रातःपदयो रात्रिमध्याह्नलक्षणा पियुक्ता
उपांश्वि मांसध्यांऊ यीस्तानुयासिमांच ॥ ऋत्यैः परिवृत्तो नुस्कानातितृप्तायसंविशेत् मध्यंदिने मनुष्याणां
मध्यंदिमनुष्या अन्नमश्यवहरंतीत्यादिवाक्यप्राप्तानुवादत्वात् पूर्वमतद्वयेनु विधौ लक्षणातिक्लिष्टेति
दिक भोजने च पंचग्रासनदशानं मौननियमः ततस्व नियतियमः पंचग्रासान्महामौनं प्राणाद्याप्यायनं महा-
दिति हवमनस्के पुराणेः ग्रासास्यतो वहरणाः भुक्तिमुक्तोग्निः श्रियं हरेत् भुंजतो मच्छरापुष्यं तस्मान्मौनं
त्रिषु स्मृतमिति अत्र विशेषः पृथ्वीचंद्रोदयस्मृतिरत्नावल्यो यवीयान्यपि ताप्यत्वमुक्ताम्माह्निकभोजनं रामः
॥१५२॥

प्राणाग्निहोत्रादन्यत्र नासौ मौनं समाचरेदिति मौनी वाप्यथवा मौनी प्रहृष्टः संयतेंद्रियः भुंजीत विधिवद्विप्रो
न चोच्छिष्टानि वापयेदिति न प्रकिरेदित्यर्थः पैठीनसिः लवणं व्यंजनं घृतं तैलं तथैव च लेह्यं पेयं च वि
धिं विहस्तदत्तं न भक्षयेदिति स एव स्वादेयं घृतान्नं तु समस्तव्यंजनानि तु यथा उदकं यच्च पक्वान्नं योद
द्याद्धस्तेन मिच्छती स भ्रूणहा सुरापश्च स स्तेनो गुरुतल्पगः इति शातातपः हस्तदत्तानि चान्नानि प्रत्यक्षलवणं तथा
मृत्तिकाभक्षणं चैव गोमांसाशनवत्स्मृतमिति आश्वमेधिके उदक्यामपि चंडालं श्वानं कुक्कुटमेव च भुंजा
नो यदि पश्येत्तु तदन्नं तु परित्यजेत् केशकीटावपन्नं च मुखमारुतवीजितं अन्नं तद्राक्षसं विद्यात्तस्मात्तत्परिव
र्जयेत् शातातपः एकस्यासनोपविष्टस्य योश्नुते प्रथमं द्विजः बहूनां पश्यतां सोज्ञः पंक्त्या हरति किल्बिषं
गोभिलः एकपंक्त्युपविष्टानां विप्राणां सह भोजने यद्येकोपि त्यजेत्पात्रं नाश्नीयुरितरेप्यतु मोहाद्भुंजीय
स्तत्र तप्तकृच्छ्रं समाचरेत् भुंजानेषु तु विप्रेषु पात्रं परित्यजेत् भोजने विघ्नकर्तासौ ब्रह्महापि तथोच्यते इ
ति इदं च गुरुभिन्नेष्वाचांते उच्छिष्टे वा बोध्यं तदाह हारीतः अन्यत्र गुरुभिराचमनोत्थानं चेति पंक्तिस्था

आ॰ म॰

॥६५॥

नां भोजननिषेधप्रयोजकमिमित्तविशेषः । अयं च निषेधो युगांतरपरः । उच्छिष्टस्यापि वर्जमिति कलिनिषेधेषु
पाठाद् इति केचित् । तन्न । एकस्मिन्नुपस्थितेऽपीतरपात्रस्थान्नस्योच्छिष्टत्वाभावेन तद्वर्जनाप्रसक्तेः । वस्तुत
स्तु उच्छिष्टस्यापवर्जनमिति पाठः । तदर्थस्तु अपवर्जनं दानं तच्च ब्राह्मणायोदगुच्छिष्टं च पृच्छेदिति म
धुपर्कप्रसक्तं कलौ निषिध्यते । निर्णायि चेदं प्राक्तच्चरणैः कलिवर्ज्यविवेके बृहस्पतिनस्पष्टो ह्यामद
स्तेनं तु जात्वो नेकदाचन न पादौ न शिरो वसिनं पदा नाजनं न स्पृशेदिति । आदित्यपुराणे । नोच्छिष्टो
ग्राहयेदान्यं मध्यात्रिष्टं न संत्यजेत् । स्वस्मुक्तावशिष्टं तु नाद्याज्ञोपस्थितं त्वपाति । ब्रह्मपुराणे । यस्तु पाणित
ले भुंक्ते यश्च फूत्कारसंयुतं प्रसृतांगुलिनिर्यश्च तस्य गोमांससदृशं तत्तन्नाणां भोजनं कुर्यात् कुर्यान्नो तिबुनुश्चि
त नार्द्रवासा नार्द्रशिराश्चैवाजयतोऽपवा न प्रसारितपादस्तु याद्दारोपितयाणिमान्नं न वेष्टितशिराश्चापि
नोत्संगकृतभोजनयाम शेषं न चाप्याश्याल्यागावशेषं पिबेन्न च शाकमूलफलोत्स्रगांदत छेदेन न कायेत्
बहूनि तु जनांमध्येनाप्ययच्छत्वरान्वितः । वृथा न विकिरेदन्नं नोच्छिष्टः क्वचिद्व्रजेत् । हृदमनु न

राम:

॥२५३॥

पिबेन्न च भुंजीत द्विजः सव्येन पाणिना नैकहस्तेन च जलं शूद्रेणावर्जितं पिबेत् । पिबतो यत्पतेत्तोयं भोजने
मुखनिःसृतं अभोज्यं तद्भवेदन्नं भोक्ता भुंजीत किल्बिषं । पीतावशेषितं तोयं ब्राह्मणो न पुनः पिबेत् । पिबे
द्यदि हि तत्तोयं द्विजश्चांद्रायणं चरेत् इति । कौर्मे । नार्द्रवासा न मध्याह्ने नाजीर्णे नार्द्रवस्त्रधृक् । न भिन्न
भाजने चैव न भूम्यां न च पाणिषु । नोच्छिष्टो घृतमादद्यान्मूर्द्धानं स्पृशेन्नापि न ब्रह्म कीर्तयेच्चापि नानि
ःशेषं न भार्यया । नांधकारे न चाकाशे न च देवालयेष्विति । भार्ययेति सहयोगे तृतीया । शातातपः । उद्धृत्य वा
महस्तेन यत्तोयं पिबति द्विजः । सुरापानेन तत्तुल्यं मनुराह प्रजापतिः । अत्र तोयं पाणिनखस्पृष्टं ब्राह्मणो न पि
बेत् क्वचित् । सुरापानेन तत्तुल्यं इत्येवं मनुरब्रवीत् । याज्ञवल्क्यः । संधिनिर्दशावत्सागोपयः परिवर्जयेत् ।
अौष्ट्रमेकशफं स्त्रैणमारण्यकमथाविकमिति । औष्ट्रमिति विकारमात्रेत्र द्वितते नोष्ट्रसंबंधिमानमाप
पिति शिष्टं । गौतमः । गोमहिषाजाक्षीरमनिर्दशायास्तु तके जा महिषी अनित्यमाविकमपेयमौष्ट्रमैकशफं च स्य
न्दिनीयमसूत संधिनीविवत्सायाश्चेति । अत्र विवत्साया गौरेव वर्ज्यं न महिष्यादेरपि गौत्वसमवायिववयावि

श्रा॰म॰

॥६६॥ शोषमेव वसपद शाकान्ते न महिष्याः प्रत्येतदस्य भक्षकरातेन विवस्वागवाशिशितिहरीदन्तीयमाह पदे
परास्तं स्पृंहितीपस्तवस्तना येम स्वयैमित्तलननीमं धिनीसुगर्न्नामायं प्राप्तवतीति क्रम्यपाद्गधेसायोजि
तान्यवसावा॥ अन्त्यपारव्याने विवस्वा पदं पुनरुक्तमिति केचित् तत्रतदर्थयोः पुरस्परव्य न्निचन॥ विज्ञा
नेश्वरोप्येवमेवाभिप्रैति॥ श्लोकगौतमकल्लाल ब्रमणमावृक्कस्पोल्लखलस्य च॥ एतेषां विनदोपाव ब्रावल्क
लम भोजनं कात्यायनः॥ कंडालप्रतितोदक्यावाक्यं श्रुत्वा द्विजोत्तमः॥ भुंजीत ग्राससमात्रं तु दिनमेकमभोजनं॥
न्नरपेक पंक्तांनामापा ब्रा स्तणैः स्वजनैरपि को द्विजानांतिकं कस्य प्रछन्नं पातकं भवेत्॥ एकपंक्त्युपवि
ष्टानांउ सनांपृथु रात्मनां सर्वेषां तत्समं तावद्यावत्पंक्तिर्नभिद्यते॥ अपितान्नस्मना चैवस्तं भेनसलिलेन च
द्वारेण च वर्त्मना गेण पंक्तिर्भेदो बुधैः स्मृत इति॥ यवैष्टितशिरा भुंक्ते दक्षिणामुखः॥ वामपादकरः स्थित्वा तद्वै
रक्षांसि भुंजते॥ इति वामपादे करो यस्येत्यर्थः॥ स्थित्वा तु पवित्रपः मनुः॥ आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं रामः
दक्षिणामुखः॥ श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते उदङ्मुखः॥ इति दक्षिणामुखनिषेधस्तु नित्यभोजनतस ॥१५४॥

रः॥ अथ भोजनोत्तरांगानि देवलः भुक्तोच्छिष्टं समादाय सर्वस्मात्किंचिदाचमेत्॥ उच्छिष्टभागधेयोभ्यः सोद
कं निर्वपेद्भुवीति॥ तत्र मंत्र रौरवे पुण्यनिलये पद्मार्बुदनिवासिनां उच्छिष्टोदकमिच्छानां अक्षय्यमुप
तिष्ठतामिति॥ व्यासः ततस्तु ग्राससन्न्यस्तापिधानमसीत्यपः प्राश्य पतस्मादेशान्न नागपस्त्यविधिवदा
चामेदिति॥ श्लोकगौतमः गंडूषस्यापरमयेतज्जन्माव क्काचालनं कुर्वीत मूढात्मा रौरवे नरके पतेदिति॥ त
घातम्भित्वा चमनं कुर्याद्यन्नमंडेष्य भुक्तवान्॥ पृथ्वीतिस्पतिना चातो भुक्तवानासनात्ततः स्नानं स दद्यकु
र्वीत सोन्यथा प्रयतो भवेदिति॥ व्यासः हस्तं प्रक्षाल्य गंडूषं यः पिबेदविचक्षणः॥ इति सदेवांश्च पितृंश्चैव ह्यात्मा
नं चैव घातयेदिति कौम्यः अनंतरं पुनराचामेदायं गोरितिमंत्रतः॥ द्रुपदां वा त्रिरावर्त्य सर्वपापप्रणाशिनी
प्राणानां ग्रंथिरसीत्यालभेत हृदयं ततः॥ आचम्यांगुष्ठमात्रीय पादांगुष्ठे तु दक्षिणे निस्रावयेद्धस्तजलमूर्ध्व
हस्तः समाहितः॥ कृत्वानुमंत्रणं कुर्यात् छ्रद्धा पामितिमंत्रत॥ अत्राग्नरेणात्मा नेयोधस्तजलेयेव
लगेति हि॥ सर्वेषामेवयागानामात्मयागपरःस्मृतः योनेनविधिनाकुर्यात्सयाति ब्रह्मणःपदमिति विष्णु

आ॰म॰
॥६१॥

सर्वेषामेव यागानामात्मयागः परः स्मृतः॥ विष्णुरत्तातथैवान्नं परिणाम स्वयं वैतथा सत्येनतेन वै भुक्तं जीर्य
त्वन्नमिदं यथा॥ इत्युक्त्वापस्वहस्तेन परिमृज्यान्न पीठं रं सुनायासं प्रदायातिकुत्कर्माण्यपतंदितइति स्मृतिः॥
आचांतोप्यशुचिस्तावद्यावत्पात्रमनुद्धृतं उद्धृतेप्यशुचिस्तावद्यावन्नोन्मृज्यते मही॥ हस्तावपि द्विजिप्यायांता
व॥ त्स्यादशुचिः पुमान् आसनादुत्थितस्तस्माद्यावन्न स्पृशते महीमिति मार्कंडेय॥ भूयोप्याचम्य कर्त्त
व्यं ततस्तांबूलभक्षणमिति वसिष्ठः॥ सुपूगं च सपत्रं च चूर्णेन च समन्वितं॥ अदत्वा द्विजदेवेभ्यस्तांबू
लं वर्जयेद्बुधः॥ एकपूगं सुखारोग्यं द्विपूगं निःफलं भवेत्॥ अतिश्रेष्ठं त्रिपूगं च ह्यधिकं नैव दुष्यति॥ पर्ण
मूले भवेद्व्याधिः पर्णाग्रे पापसंभवः॥ चूर्णपर्णं हरेदायुः शिरा बुद्धिविनाशिनी॥ तस्मादग्रं च मूलं च शिरां
चैव विशेषतः॥ चूर्णपर्णं वर्जयित्वा तांबूलं खादयेद्बुधः॥ इति॥ अथ भोजनोत्तरकृत्यं दक्षः॥ इतिहासपुरा
णाद्यैः षष्ठसप्तमौ नयेत्॥ अष्टमे लोकयात्रा तु बहिः संध्या ततः पुनः॥ यम॥ रवेरस्तमयात्पूर्वं घटिकै राम॰
का यदा भवेत्॥ सायंसंध्यामुपास्याथ कुर्याद्धोमं च पूर्ववत्॥ तत्रापि कालः संवर्त्तः॥ रवेरस्तसमारभ्य यावद्भ ॥१५५॥

र्यदर्शयेन्नवेत्॥ यस्यातिष्ठेद्गृहे दीपस्तस्य नास्ति दरिद्रता॥ आयुष्यः प्राङ्मुखो दीपो धनदः स्यादुदङ्मुखो
दुःखदोसौ हानिदो दक्षिणामुखः॥ संध्यावंदनं पूर्वमुक्तं॥ तत्र विशेषमाह व्यासः॥ जपेद्वारुणमंत्रांस्तु इमं मे वरु
णादिकान्॥ चतुर्मंत्रान्विशेषज्ञः संध्याफलमवाप्नुयात्॥ संध्यावंदनाकरणे जमदग्निः॥ एकाहं चाप्यतिक्र
म्य संध्यावंदनकर्म च॥ अहोरात्रोषितो भूत्वा गायत्र्ययुतं जपेत्॥ द्विरात्रे द्विगुणं प्रोक्तं त्रिरात्रे त्रिगुणं भ
वेत्॥ त्रिरात्रात्परतश्चेत्स्याच्छूद्र एव न संशयः॥ कालातिक्रमे पारिजाते गौतमः॥ संध्याकालेत्वतिक्रांते स्नात्वा
चम्य यथाविधि॥ जपेदष्टशतं देवीं ततः संध्यां समाचरेदिति॥ वसिष्ठस्तु कालातिक्रमणे चैव त्रिसंध्यमपि सर्व
दा॥ चतुर्थार्घ्यं प्रकुर्वीत भानोर्व्याहृतिमंत्रपूर्वतः॥ यमस्तु प्राणायामत्रयं प्रातः संगवे द्विगुणं चरेत्॥ मध्या
ह्ने त्रिगुणं प्रोक्तं अपराह्ने चतुर्गुणं॥ सायाह्ने पंचगुणकं संध्यातिक्रमणे भवेत्॥ युदादीधेति मंत्रे च स
मवारं जपेत्तु द्वि॥ अकाले कुर्वतः कर्म॥ काले कालेकृतानि तु भवंतीति शेषः॥ आद्यभोजने तु गर्गः॥ स्नात्वा
त्वा पिवेत्पिपासया आद्यभुग्ध्वजः॥ ततः संध्यामुपासीत तस्माद्वेतु तदनंतरं॥ इदं तु संध्याधिकारार्थं न तु आद्यभोज

आ॰ म॰
॥ ६८ ॥

न प्रायश्चित्तमिति निर्णयसिंधुः प्रायश्चित्तमेवेत्यन्ये तत्तु गुरुप्रायश्चित्तांतराशक्तविति अथ सायंहोमकालः ॥
कात्यायनः स्त्रियैस्तु शैलं समप्राप्तेषड्विंशतिर्गुलैः पाडकाकरणमग्नीनां प्रातर्मासांत्व दर्शनात् तथा चाव
सम्पद्‌यते न नस्य द्वाणि सर्वतः नचलोदितिमायातिता ऋस्माय चकृयत इति अथ स्वापः गार्ग्यः शु
चिदेशं विविक्तं तु गोमयेनोपलेपयेत् वैदिकैर्गारुडैर्मंत्रै रभिमंत्र्य स्वपेत्ततः मंगल्यं पूर्णकुम्भं च शिरःस्थाने
निधापयेत् आधौतसुष्कया दक्तस्वाचांतः शयेच्च वैः अनिष्टदेवतां स्मृत्वा तां स्वविशेन्मंगलध्वनैः रात्रिसू
क्तं जपन्रात्रैरावि ज्ञानो भवेन्नरः तथा पूर्वरात्रैरोव्यतीते तु सगच्छेदिति मदिरं पादौ प्रक्षालयेत्पूर्वं पश्चात्खट्वां
समाविशेत् तः धौतवस्त्रं च तां वृलं संयोगेच्च शुचावहं अथ पत्न्युकृत्यं मनुः पादौ नमस्कृत्य पश्चाच्छय्यां
समाविशेत् अथ परतिं संस्कृत्य परमात्मानं पत्या जघे प्रसारयेत् योनिस्पृष्ट्वा जपेत्स्तत्रं विष्णुर्योनिं
प्रजापतेः रेतांसिचेत्ततो योन्यां तस्माज्जर्भं विभर्त्तिसेति याज्ञवल्क्यः षोडशर्तुनिशास्त्रीणां तस्मिन्युन ॥ राम॰
युग्मासु संविशेत् ब्रह्मचार्येव पर्वण्याद्याश्चतस्रश्च वर्जयेत् यथाकामीभवेद्वापास्त्रीणां वरम ॥ २५६ ॥

नुस्मरन्निति कौर्मेऽतु कालोनिगामित्वं स्वदारेषु तात्मव पर्वं वर्जं गृहस्थस्य ब्रह्मचर्यमुदाहृतमिति एवं च
कारेण गच्छत आद्यादौ न ब्रह्मचर्यहानि दोषइतिमिताक्षरायां पंचदशादिनपर्यंतं गमनाजावेत्यदि नेच
श्राद्धप्रसक्तौ तद्दिने दोषाभावपरमिदमितिहेमाद्रिः प्रमाणांत्वनचित्यं मनुः तामामाद्याश्चतस्रस्तु
निंदितैकादशी तथा त्रयोदशी च शेषास्तु प्रशस्ताः दशरात्रयः इति तथा अष्टम्यां चतुर्दश्यां दिवापर्व
णि मैथुनं कृत्वा सचैलं स्नात्वा तु वारुणीश्च मार्जयेत् मनुः अमांवाष्टमी चैव पौर्णमासी चतुर्दशी ब्रह्म
चारी भवेन्नित्यमप्यृतौ स्नातको द्विज इति तथा स्त्रीणां तु प्रेक्षणात्स्पर्शाद्यः स्पृष्टगा भाषणात् स्यंदते ब्रह्म
चर्यं च न दारेष्वतु संगमात् इति तथा कृतौ तु गर्भशंकित्वात्स्नानं मैथुनः स्मृतं अनृतौ तु यदा गच्छेच्छौचं म
त्रपुरीषवदिति विष्णुः कृतपादादिशौचस्तत्पुनस्काशायततो गृहीः गच्छेच्छय्यामस्फुटितामपि दारुमयीन्द्र
पेति गच्छेच्छय्यां शयनार्थमित्यर्थः शयनविधिमाह हारीतः सुप्रक्षालितचरणः सर्वतोरक्षां कृत्वोदक
पूर्णघटादिमंगलोपेतमात्मानिरुचितामनुपहतांसु नाराणमिति पठन्शय्यामधिष्ठायरात्रिसूक्तं ज

श्रा·म·

॥६९॥ पित्वाविष्णुंनमस्कृत्यसर्पापसर्पमंत्रंतेइत्येतत्स्तोत्रवज्जन्तेष्टदेवतास्मरणंकृत्वासमाधिमास्थायान्योश्यवैदि
कान्मंत्रान्मानवीनाचजस्वामंगलेभ्युचितंरक्षच्छ्रुएवनदक्षिणशिरःस्वपेदिति॥विष्णुपुराणे रात्रिसूक्तं
जपेत्सुत्वादेवोश्चसुखशायिनं॥नमस्कृत्याव्ययंविष्णुंसमाधिःस्थःस्वपेन्निशाति॥सुखसुप्तापिनोदेवागो
मिलेनदर्शिता॥अगस्तिर्माधवश्चैवमुचुकुंदोमहामुनि॥कपिलोमुनिरास्तीकः पंचैतेसुखशायिन
रनइति॥दक्षिणशिरसाइति प्रदर्शनार्थो तथाचविष्णुपुराणे॥प्राच्यांदिशिशिरःशस्तंयाम्यायामथवान्
पासदैवस्वपतःपुंसोविपरीततुरोगदमिति॥हारीतोपि नतिर्यगुदकशिराः॥कोणशिरापश्चिमशिराउ
त्तरशिराश्चेति॥दिग्विशेषेणफलविशेषउक्तो मार्कंडेये॥प्राक्शिरःशयनेविद्याद्धनमायुश्चदक्षि
णे॥पश्चिमेप्रबलाचिंताहानिमृत्युमथोत्तरे॥अस्यत्वविशेषेविशेषमाहगार्ग्यः स्वगृहेप्राक्शिराःशेते
श्वाशुर्येदक्षिणाशिराः॥प्रत्यक्शिराःप्रवासेतुनकदाचिदुदक्शिराइतितथा॥पानिकानिचशुण्यानि
यत्किंचिदतुलेपनं॥अलक्ष्मीपरिहारार्थंनित्यंकुरुयुधिष्ठिरशयने॥नैववर्ज्यंसंध्यानान्याहमार्कंडेयः॥प्र राम:

॥१५७॥

न्यास्नयेस्मशानेचराकदर्दशेचतुष्पथे॥महादेवगृहेवापिमात्रवेस्मनिनस्वपेत्॥नयज्ञनागायतनेस्कंदस्
स्यायतनेतथा॥कूलच्छायामुत्तथाशार्करलोष्टपांसुषु॥नस्वपेच्चतथाद्भिर्विनाहीनोचकर्ह्यंचन॥धान्यगो
धनविप्राणांचतपोपरिनाकाचोसर्वतःशून्येनचचैत्यद्रुमेतपेति॥निषिद्धशय्योक्ताविष्णुपुराणेनविशा
लांनवाभग्नांनासमांमलिनांतथा॥नवंजनमयींशय्यामधितिष्ठेदनास्तृतां नतुजंतुमयीमपिकचित्याव
॥दंतमयामृतस्त्रीदंतमयामित्यर्थः॥तथाचतत्रैवमृतदंतमयेविद्धदुग्धेदग्धेपुजाशजे॥नशयीतनरो
धान्येशयनेपंचदारुजे॥पंचदारुणिकोचोक्ताणीचूडमांतथा॥अश्वत्थपावोल्छिनाश्चैववटमिकेतरुंतथा॥
करिनमहतेचैवनशयीतकदाचनेरइति॥इतिस्वापकालमाहदक्ष॥प्रदोषपश्चिमौयामौवेदाभ्यासेनयोजये
त्॥यामद्वयंशयानस्तुब्रह्मभूयायकल्पतइति॥तथा॥निजासमासाघतंबलंवदनात्यजेत्॥पर्यंकात्वम
दोनालातुछुंघुष्पाणिमस्तकात्॥इतिशयनविधिः॥तदेतदाह्निकमाह्निकमेतत्त्वकरणैपृत्यवायउक्तं
कौर्मे॥इत्येतदखिलंप्रोक्तंमहन्यहनिवैद्विजा॥ब्राह्मणानांकृतंजातमपवर्गफलप्रदं॥नास्तिक्यादथवाल

श्रा·म·
७०॥

स्याद्भूतलेनेन करोति यः स्वपिति नरकान्घोरान्का कथा नीचजायते नान्यो विमुक्तये पंथा मुक्त्याश्रयवि
धिस्त्वकं तस्मात्कर्मणि कुर्वीत तत्त्वये परमेष्ठिन इति अथ रात्रौ स्वप्नफलनिर्णयः तत्रादौ स्वप्नदर्शनाव
स्था माहवैद्यः सर्वेंद्रियेषूपरतो मनोनुपरतं यदा विषयेभ्यस्तदा स्वप्नं नानारूपं प्रपश्यति इति स च स्वप्नो द्वि
विधः इष्टफला निष्टफलश्चेति तत्र सामान्यत इष्टफलो यथा नदीसमुद्रतरणमाकाशगमनं तथा नास्क
रोहयनं चैव प्रज्वलंतकृतानलं ग्रहनक्षत्रताराणां चंद्रमंडलदर्शनं हर्म्यस्यारोहणं चैव वृक्षादशिरसोपि
वाएवस्त्रदीनि संदृष्ट्वा नरः सिद्धिमवाप्नुयात् स्वप्ने तु मदिरापानं च सामामांसस्य भक्षणं क्रिमिविष्ठानुपं
चरुधिरेणाभिषेचनं भोजनं दधिभक्तस्य श्वेतवस्त्रानुलेपनं रत्नान्याभरणादीनि स्वप्ने दृष्ट्वा प्रसिद्धाति
देवविप्रद्विजश्चवृतुषपंकजपार्थिवान् शुक्लपुष्पांबरधरान् प्रख्यातान्नराणां गतौ वृषेभपर्वतस्त्री
राफलवृक्षाधिरोहणं सूर्यस्याभिषमांस्याग्निस्तरणं च महोअसारदृष्ट्वा स्वप्ने धर्मलाभः स्यात्प्राप्य धिमु रामः
क्तश्च जायत इति सामान्यतो निष्टफलो यथा कृपकिंशुकवल्मीकं पारीनद्याधिरोहणं तैलकर्पास ॥१५९॥

पिण्याकलोहवा निर्विपत्तये विवाहकरणे स्वप्ने रक्तस्रग्वस्त्रधारणं स्त्रोतमाहरणं नेष्टं पक्वमांसस्य भोज
नमिति तद्वे वृद्धिविधस्यापि स्वप्नस्य दर्शनकालभेदेन फलेपि भेदः स्वप्नाध्याये स्वप्नात्तु प्रथमे यामे संव
वत्सरविपाकिनः द्वितीये चाष्टभिर्मासैस्त्रिभिर्मासैस्त्रियामिके चतुर्थयामेयः स्वप्नो मासेन फलदस्स्मृ
तः अरुणोदयवेदवेलायां दशाहेन फलं भवेत् गोविसर्जनवेलायां सद्य एव फलं भवेदिति अथ वि
शेषत इष्टफलाः स्वप्नाः यस्तु पश्यति स्वप्ने राजानं कुंजरं हयं सुवर्णं वृषभं गां वा कुटुंबं तस्य वर्द्धते आ
रोहणं गोवृषकुंजराणां प्रासादशैलाग्रवनस्पतीनां विष्ठानुलेपो रुदितं मृतं च स्वप्ने प्यगम्यागमनं च ध
न्यं श्चौरिणां फलिनं वृक्षं एकाकीयः प्रछति तत्रस्थः सविबुध्येत धनं श्री घ्रमवाप्नुयात् यस्य श्वेतेन सर्पे
ण यस्यतो दक्षिणे करे सहस्त्रलाभस्तस्य स्याद्पूर्णे दशमे दिने उरगो वृश्चिको वापि जलेयसतिय न्नरं
विजयं चाप्यसिद्धिंच पुत्रं तस्य विनिर्दिशेत् प्रासादं शैलमारुह्य समुद्रतरते नरः अपि दासकुलेजा
तो राजा भवति वै ध्रुवं यस्तु मं भ्येतडागस्थं तु फेचघृतपायसं अरवं डे उ धु बले रे पत्रे तं विद्यात्दयिवी

स्वा.म.

॥७२॥

पतिं बलाकां कुक्कुटीं क्रौंचीं च द्दष्ट्वाय ॥ प्रतिबुध्यति कुलजां लभते कन्यां भार्यां सुप्रियवादिनीं ॥ निगडैर्बध्यते
यस्तु बाहुपाशेन वा पुनः ॥ पुत्रो वा जायते तस्य धनं शीघ्रमवाप्नुयात् ॥ आसने शयने यान शरीरे वाहने गृहे ॥
ज्वलमाने विबुध्येत तस्य श्रीः सर्वतोमुखी ॥ आदित्यमंडले स्वप्ने चंद्रं वा यदि पश्यति ॥ व्याधितो मुच्यते रोगा
द रोगश्चायमाप्नुयात् ॥ रुधिरं पिबति स्वप्ने सुरां वा पिबते यानरः ॥ ब्राह्मणो लभते विद्यां मितरो लभते धनं ॥
शुक्लांबरधरा नारी शुक्लगंधानुलेपना ॥ अवगूहति यं स्वप्ने श्रियं तस्य विनिर्दिशेत् ॥ पादुकोपानहौ छ
त्रं लब्धाय प्रतिबुध्यते ॥ असिं वा निर्मलं तासां साध्वलं तस्य निर्दिशेत् ॥ रथं गोवृषसंयुक्तमेकाकीय ॥ चति
रोहति ॥ तत्रस्थः स विबुध्येत धनं शीघ्रमवाप्नुयात् ॥ दधिलाभे च नवेदयो घृतलाभे ध्रुवं यशः ॥ घृताश
ने ध्रुवः क्लेशो यशस्तु दधिभक्षणे ॥ अंत्रेस्त्वचेष्टितो यो वै नगरे पिग्रहे पि वा ॥ गृहे मांडलिको राजा न
गरे पार्थिवो भवेत् ॥ मानुषाणि तु मांसानि स्वप्नांते यस्तु पश्यति ॥ हरितानि तु पक्वानि श्रृणु तस्य च यत्फलं ॥ राम:
यद्भक्षणे शतं ज्ञानं सहस्रं बाहुभक्षणे ॥ राज्यं शतसहस्रं वा भवेद्वै शीर्षभक्षणे ॥ सर्वाणिस्तु क्षान्यपि शो ॥१५८॥

ननानिकार्पासभस्मोदनतक्रवर्जं सर्वाणि शुक्लान्यतिनिंदितानि गोहस्तिदेवद्विजवाजिवर्ज्यं ॥ क्षीरं पिब
ति यः स्वप्ने सफेनं दोहने कृते सोमपानं भवेत्तस्य तु स्का भोगानशेषतः ॥ दधिदृष्ट्वा भवेत्प्रीतिर्गोधूमांश्च ध
नागमः यवान्यज्ञागमं विद्यात् छत्रं तमिहार्थकान्यपि नागपत्रं लभेत्स्वप्ने कर्पूरमगरं तथा चंदनं पांडुरेषु
ष्यं ॥ तस्य श्रीः सर्वतोमुखी ॥ अथ विशेषतो निष्फलाः स्वप्नाः तत्र शौनक ॥ अथ स्वप्नानि वक्ष्यंते निमि
त्ताद्भुतानि तु ॥ आदित्यं वा यदि चंद्रं वा विगतछविकं तथा पतंतं वा घनस्तत्रं नारकादींश्च वा यदि वा स्येनमान
वः स्वप्ने मरणं शोकमाप्नुयात् ॥ स्वप्नाध्याये स्य शोकं करवीरं चापलाशं वा यथ पुष्पितं स्वप्नांते यस्तु पश्येत
नरः शोकमवाप्नुयात् ॥ नावमारोहये यस्तु नदीनां च समुत्तरेत् ॥ प्रवासं निर्दिशेत्तस्य शीघ्रं च पुनरागमं ॥ रक्तां
बरांधरा नारी रक्तगंधानुलेपना ॥ अवगूहति यः स्वप्ने मृत्युं तस्य विनिर्दिशेत् ॥ तैलेनाभ्यक्तकायस्तु पयसा
तु घृतेन च स्नेहेन वा तथान्येन व्याधिं तस्य विनिर्दिशेत् ॥ केशा यस्य च शीर्यंते यदि दंता पतंति वा ॥ अर्थना
शो भवेत्तस्य पुत्रो वाय दिनश्यति वरो हूमा हि षरथमेकाकी यः प्ररोहति ॥ तत्रस्थः स तु बुध्येत मृत्यं

स्मा·म·
॥७२॥

णी घ्रमवाप्नुयात्॥ कर्णनासाकरादीनां छेदनं पंकमज्जनं॥ पतनं दंतकेशानां यकृन्मांसस्य भक्षणं॥ ख
रोष्ट्रमाहिषपानं तैलाभ्यंगं च भस्मतवे॥ इति स्वप्नफलनिर्णयः॥ अपस्वप्नस्यादिशांति॥ अरुंधती ध्रुवं
चैव विष्णोस्त्रीणि पदानि च॥ आयुर्हीनातपश्यंति चतुर्थं मातृमंडलं॥ देहेप्यरुंधती जिह्वा ध्रुवो नासाग्र
मुच्यते॥ भ्रुवोर्मध्यगतं मध्यं तारकामातृमंडलं॥ आकाशेश्रवणो यस्मिन्नद्योषं मृत्युयातनायान्नोमंडाकि
नामंडोस्यायाने केकुनायुषः॥ यंमुपंकादि घुन्नसलरवं यस्य पदान्नवेत्॥ पुरतः पृष्ठतो वापि सोमामान्न
जीवति॥ अपयउस्वप्नशांतिमाहशौनकः॥ एवमादीनि चान्यानि अरिष्टकानिव कृन्यपि स्वप्नोत्पातानि चैतेषां
कालरात्र्यधिदेवता॥ पूजाविधानं पूर्वोक्तं कुर्याद्विप्रापिपलतः॥ पूर्वोक्तमितिरात्रिसूक्तकल्पग्रदिस्मर्थः
रात्रिसूक्तकल्पस्थग्रंथगौरवभयान्न लिखितं॥ होमं कुर्यात्प्रयत्नेन रात्रावेव द्विजोत्तमाः॥ उक्तेनैव विधानेन
स हुतं पायसं कुर्यात्॥ उक्तेनैव विधानेनेति स्वगृह्योक्तविधानेनेत्यर्थः॥ घृतसिक्तं पायसं कृत्वा रात्रीव्यरव्यै
दितिक्रमात्॥ अष्टोत्तरशतं कृत्वा सूक्तेनानेन वित्तया स्वप्नाधिपतिमंत्रेण कुर्तेदष्टोत्तरं शतं स्वप्नाधिप

रामः
॥२६०॥

२

[..]·
॥७३॥

तिमंत्रेण कालरात्रेनामिमंत्रेणेत्यर्थः॥ ततः स्विष्टकृतं कृत्वा होमशेषं समापयेत्॥ पूर्वोक्तमभिषेकं यत्तदत्रा
पि विधीयते॥ पूर्वोक्तमग्रहयज्ञोक्तमित्यर्थः॥ गुरुर्वेद दक्षिणां दद्यात् हेमपश्वन्नपिच्छ चक्तदक्षिणां नाबो
प्यन्नाक्तोमकर्मणि हिरण्यं दक्षिणां दद्यात् दानामेव वा बुध॥ वस्त्रकुंनादिसकलं तत्र देवप्रतिपादयेत्॥
ब्राह्मणान्भोजयेच्छक्त्या सुशीलान्वेदपारगान्॥ नक्षेणेषु पायसाद्यैश्चरतानिसुवकुनिच॥ अनेनवि
धिना यस्तु शांतिं कुर्वीत शक्तितः॥ तस्य वर्षशतायुष्यं भवत्येवन संशयः॥ ॥इतिश्रीमीमांसापाराबा
रपारीणधुरीणमहदेशंकरसूनोर्नंदनालकं वस्य कृतावाचारमयूखः॥ स पूर्णः कल्याणमस्तु शुभं भ
वतु॥ ॥श्रीरस्तु॥ ॥छ॥ ॥श्री॥

रामः
॥२६१॥

২. আঙ্কু।৮